नं. ८८

कारकवादः

अपूर्ण

२३-पत्राणि

सं०: ८८

कारकवादः ८८

23 पत्राणि

गां दोग्धीति अंतःस्थितद्रवद्रव्यविभागानुकूलव्यापारानुकूलव्यापारो दुहेरर्थः व्यापारद्वयोद्देश्यतया दुग्धस्य प्राधान्यं तद्वैपरीत्या
द्गौर्गौणत्वं विभागानुकूलव्यापारस्य पयोनिष्ठत्वेनुप्रधानीभूतधात्वर्थव्यापारजन्यफलाश्रयत्वात्पयसः प्राधान्यं अयोगोः प
यस्त्यजतिग्वापयस्त्याजयतीत्यर्थः अन्ये पयो गां त्यजति पयस्ता गां त्याजयतीत्यर्थः यदा तु द्रवद्रव्यनिष्ठविभागानुकूलव्यापार एव
दुहेरर्थस्तदा गोरुपादानत्वाविवक्षायामप्यनेन कर्मत्वं अपादानत्वविवक्षायां पंचमी पयस्यन्वये षष्ठी पयोनिष्ठविभागजनको योग
वाभिन्नाश्रयकी व्यापारस्तदनुकूलो गोपनिष्ठो व्यापारो इति वा बोधः बलिं याचते इति याचेः स्वत्वनिरसनु·रानुकूलो व्यापारोऽर्थः स्व
त्वनिरसनानुकूलो व्यापारो बलिनिष्ठः तदनुकूलो दीयतामित्याद्यभिलापरूपो व्यापारो याचकनिष्ठः बलिनिरूपितवसुधावृत्तिस्व
त्वनिरसनानुकूलव्यापारानुकूलो वामननिष्ठो व्यापारः इति केचित् अन्ये तु स्वत्वनिवृत्तिस्वत्वोत्पत्त्युभयानुकूलो व्यापारो याचेरर्थः स्वत्वे
स्वत्वे निरूपकतयान्वयस्तदा अनेन कर्मत्वं पूर्वस्य कस्यापि विषयाभावात् न चात्रापादानत्वप्राप्तिः विभागस्य धात्वर्थत्वाभावात्
न च याचना दिवा पायो भवति याचितो यदि ददाति तदापायेन युज्यते इति भाष्यात् वसुधायाः स्वामित्वसंबंधात्कर्मत्वमुक्तं व्यापारद्वया
र्थत्वे कर्तुरिति कर्मत्वमित्याहुः वसुधावृत्तिबलिनिरूपितस्वत्वनिरसनचैत्रीयस्वत्वोत्पत्त्युभयानुकूलो व्यापारश्चैत्रवृत्तिरिति बोधः अवि
नीतमिति याचेः स्वीकारानुकूलो व्यापारोऽर्थः स्वीकारश्चेदमवश्यं करिष्यामीत्यभिलापजनको ज्ञानविशेषः फलतावच्छेदकः संबंधो वि

षयता-विनयेन तद्विषयज्ञानवत्त्वं संबंधः अविनीतः प्रधानं कर्म प्रधानधात्वर्थजन्यफलाश्रयत्वादिति केचित् विनयः प्रधानं कर्म उद्देश्य
त्वादुभयव्यापाराप्यमानत्वादित्यन्ये पूर्वं विषयाभावादनेन कर्मत्वं याचनमात्रेण विनयसंबंधाभावात् अविनीतज्ञप्तिविनयविषयकज्ञान
जनकश्चैत्रनिष्ठो व्यापार इति बोधः अनुनयार्थमात्रविवक्षायामविनीतं विनयं याचत इत्यधिकरणत्वं संप्रदानत्वं वा प्राप्तं तदविवक्षायाम
नेन कर्मत्वं तंडुलानिति विक्लित्त्यनुकूलव्यापारोपसर्जनोत्पत्त्यनुकूलव्यापारः पचेरर्थः पूर्वव्यापारस्तंडुलनिष्ठः द्वितीयश्चैत्रनिष्ठः यदा वि
क्लित्तेः करणत्वविवक्षा तदा तंडुलानामोदनं पचतीति विकारयोगे षष्ठी तंडुलविकारमोदनं निष्पादयतीत्यर्थः तत्र कर्मत्वाविवक्षायां षष्ठ्यां
प्राप्तायामनेन द्वितीयेति केचित् एवं काष्ठं भस्म करोतीत्यत्र विकृत्युत्पत्त्युभयानुकूलो व्यापारोऽर्थः विकृत्याश्रयत्वेन काष्ठस्य कर्मत्वं उत्पत्त्या
श्रयत्वेन भस्म कर्म काष्ठं विकुर्वन् भस्मोत्पादयतीत्यर्थः काष्ठादेः कर्मत्वाविवक्षायामपि दुहादिगणनान्नानेन कर्मत्वमिति गर्गान्निति
स्वसंप्रदानकदानानुकूलव्यापारानुकूलो व्यापारः शासनरूपो दंडेरर्थः शासनं नियंत्रणं स्वस्य संप्रदानसंज्ञा तु न कर्तृसंज्ञया बाधात् सत्त्व
त्वोत्पत्त्यनुकूलशासनरूपव्यापारमात्रार्थकत्वे विभागाश्रयत्वविवक्षायां गर्गाणामपादानत्वं तदविवक्षायामनेन कर्मत्वमिति केचित् राज
निरूपितं पत्र शतनिष्ठं स्वत्वतदुत्पत्त्यनुकूलो गर्गनिष्ठो व्यापारस्तदनुकूलो व्यापारो राजनिष्ठ इति बोधः उद्देश्यत्वादर्थिनश्चेति बाध्यशेषाख्य
शतं प्रधानं गर्गाः गौणं कर्म अस्याकथितं सूत्रोदाहरणत्वं चिंत्यं ब्रजमवेति निर्गमप्रवेशबंधपूर्वकयत्किंचिदधिकरणकचिरस्थित्यनुकू

लोव्यापारो रुधेरर्थः व्रजे गौ स्तिष्ठति तत्र तां निर्गमप्रतिबंधपूर्वकं चिरं स्थापयतीति प्रत्ययात् अधिकरणत्वाविवक्षायामनेन कर्मत्वं गोरु
त्तिनिर्गमप्रतिबंधपूर्वकव्रजनिष्ठचिरस्थित्यनुकूलो व्यापारः इति बोधः माणवकं पंथानमिति जिज्ञासाविषयार्थज्ञानानुकूलः केन पथा
गंतव्यमित्यभिलापादिरूपो व्यापारः पृच्छेरर्थः माणवकस्य व्यापारे संबंधसामान्येनान्वयः ज्ञानविषयत्वेन पथः कर्मत्वं माणवकेन वतज्ञा
नाश्रयत्वं संबंधः कस्यापि पूर्वविषयस्याप्राप्त्यानेन कर्मत्वं मार्गविषयकज्ञानानुकूलो माणवकसंबंधी व्यापार इति बोधः केचित्तु प्रश्न
विषयार्थज्ञापनानुकूलः पृच्छेरर्थः तत्र ज्ञाप्यज्ञानाश्रयत्वेन माणवकः कर्म विषयत्वेन पथः कर्मत्वं स्ववृत्तिमार्गविषयकं ज्ञानं तदनुकूलमा
णवकवृत्तिर्व्यापारस्तदनुकूल इति बोधः परं त्वीदृशार्थे कथितोदाहरणत्वं कथमिति चिंत्यं वृक्षमवचेति विभागपूर्वकं ग्रहणं चेरर्थः वृक्षसंबं
धिफलवृत्ति विभागस्तत्पूर्वकमादानमिति बोधः वृक्षास्सत्वान्यादाने इत्यर्थप्रतीतेः अवधित्वाविवक्षायामनेन कर्मत्वं माणवकं धर्मं ब्रूते
शास्तिवेति विषयतया ज्ञानानुकूलः शब्दप्रयोगरूपो व्यापारो ब्रूञोऽर्थः ज्ञानानुकूलः प्रवृत्तिपर्यवसायी प्रश्नसेः सत्य धर्मं कुर्वित्यादि विधिघ
टितोपदेशरूपः उभयत्रापि कर्तृव्यापारानंतरं तज्ज्ञानाश्रयत्वरूपो माणवकेन संबंधः वचनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाण
त्वात्प्राप्तसंप्रदानत्वः विवक्षायामनेन कर्मत्वं माणवकसंबंधी धर्मविषयकज्ञानानुकूलो व्यापार इति बोधः केचित्तु विषयताधेयतोभयसंबं
धावच्छिन्नज्ञानानुकूलो व्यापारो ब्रूञर्थ इत्याहुः शतं जयतीति स्वसंप्रदानकदानानुकूलः स्तिरस्कारापरपर्यायः पराभावाख्यव्यापारो जयतेरर्थः

देवदत्तसंबंधिशशगतकर्मकं यद्ग्रहणं तदनुकूलो व्यापार इति बोधः सुधां क्षीरनिधिंमिमिति इत्यत्रांतर्गतसारभागोत्थानानुकूलव्यापारफलक
2 व्यापारो मंथेरर्थः उत्थानमूर्ध्वदेशसंयोगः सुधायाः ऊर्ध्वदेशसंयोगानुकूलः क्षीरनिधिसंबंधी व्यापारस्तदनुकूलो व्या-र इति बोधः एवम
र्थे सुधासमुद्रयोः कर्तुरिति कर्मत्वं उत्थानानुकूलव्यापारमात्रविवक्षायां कर्मद्वारा क्रियाश्रयत्वविवक्षणे ऽधिकरणत्वं समुद्रस्य बुद्धिकृत
विभागाश्रयत्वविवक्षणे ऽपादानत्वं तदविवक्षायामनेन कर्मत्वं सुधामुख्यं क्षीरनिधिं गोणं मुष्णातीति पराज्ञानपूर्वकग्रहणानुकूलव्यापा
रो मुषेरर्थः परो ऽस्य स्वामी देवदत्तो ज्ञानपूर्वं यच्छशकर्मकं ग्रहणं तदनुकूलो व्यापार इति बोधः ग्रहणानुकूलव्यापारमात्रमर्थो यदा तदा
देवदत्तस्यापादानत्वं तदविवक्षायामनेन कर्मत्वं ग्राममजामिति नयतेरुत्तरदेशसंयोगानुकूलव्यापारानुकूलो व्यापारोऽर्थः फलतावच्छेदकः
संबंधः प्रतियोगिता तदनुकूलो व्यापारो ग्रामनिष्ठो वहनादिरूपः एवं चोभयरूपेण व्यापारेणाप्यमानत्वादजानिष्ठसंयोगस्योद्देश्य
त्वाच्च अजा प्रधानं कर्म यद्वाप्यनुयोगितापफलतावच्छेदकः संबंधः तदनुकूलव्यापारश्चाजानिष्ठस्तदापि प्रधानभूतव्यापारजन्यफलाश्र
यत्वादजैव प्रधानं कर्म ग्रामानुयोगिकाजाप्रतियोगिकसंयोगानुकूलव्यापारानुकूलो व्यापार इति बोधः स एव स्कंधग्रहणपूर्वको वहः
गस्यानुकूलो व्यापारविशेषः वहनात्तु हरणं स्वकं देशांतरप्रापणं हरतेः मादिसाहचर्यादत्र कृषिः प्रापणार्थ एव न तु विलेखनार्थः एते द्वि
कर्मकाः मासमास्ते इति आसनपूर्विका व्याप्तिरास्तेरर्थः आसनस्य व्याप्तौ करणत्वेनान्वयः अवच्छेदकतारूपा व्याप्तिर्मासादिनिष्ठा फले

मासमासनेन व्याप्नोतीत्यर्थः एवं च कर्तुरित्येव कर्मत्वं गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्र इति यज्ञदत्तनिष्ठगमनानुकूलं देवदत्तनिष्ठ
व्यापारानुकूलो विष्णुमित्रनिष्ठो व्यापार इति बोधः भक्षयत्यन्नमिति अन्ननिष्ठगलबिलाधःसंयोगानुकूलो वटुनिष्ठो व्यापारस्तदनुकूलो
व्यापार इति बोधः जल्पयतीति ताडनपूर्वकशब्दोच्चारणं जल्पेरर्थः जल्पति पुत्रं चैत्रः ततो णिचि पुत्रकर्मकं ताडनपूर्वकं चैत्र इति शब्दोच्चा
रणं तदनु॰ र इति बोधः हृञो॰ हारयतीति कटकर्मकभृत्यनिष्ठव्यापारानुकूलो व्यापार इति बोधः अकर्मकत्वे तु विकारयत्यश्वान् अश्वैर्वा
अश्वरूपस्यान्यथाभावानुकूलो व्यापारः अभिवादयते इति देवकर्मकभक्त इति तत्तु सनुकूलो व्यापारः वैकुंठमध्यास्त इति वैकुंठाभिन्ना
श्रय इति हरिः कार्त्तिकमासने स्थितिः शयनं वा अभिनिविशते इति सन्मार्गविषयकाग्रहवान्॰ उपपदविभक्तेः संबंधोऽर्थः उभयतः कृष्णं
गोपाः कृष्णसंबंधिपार्श्वद्वयवर्तिनो गोपाः धिक् कृष्णाभक्तं कृष्णाभक्तसंबंधिनिंदेत्यर्थः उपर्युपरि लोकं हरिः लोकसंबंधिसमीपोर्ध्व
देश इति हरिरित्यर्थः अभितः परितः कृष्णं कृष्णसंबंधिसर्वोदयवावच्छेदेनेत्यर्थः सामीप्यरूपः संबंधो द्वितीयार्थः अभित इत्याभिमुख्ये कृ
ष्णस्य संमुखे इत्यर्थः अभिपरीशब्दाभ्यां तसिल् ग्रामं समया निकषा ग्रामसमीपदेशे अधिकरणशक्तिप्रधाने अव्यये हा कृष्णाभक्तं अभ
क्तसंबंधि शोकः बुभुक्षितं न प्र॰ किंचिद्विषयकप्रतिभानाभावो बुभुक्षितसंबंधीत्यर्थः अंतरा त्वामिति अंतराशब्दो मध्य इत्यर्थे अवधि
त्वं द्वितीयार्थः त्वन्मदवधिकमध्य इति हरिः अंतरा हरिं न सुखं अभाववानंतराशब्दार्थः प्रतियोगित्वं द्वितीयार्थः हरिशब्दस्तत्प्रतियो

लक्षणेकः हरिभक्तिप्रतियोगिकाभावसमानाधिकरणः सुखसत्ताऽभावः एवमंतरेण शब्देऽप्युभयार्थो बोध्यस्तद्योगेपि द्वितीया त्वन्मत्संबं
3 धीकमंडलुर्मध्ये इत्यर्थे त्वं मम चांतरा कमंडलुरिति प्रयोगो बोध्यः जपमन्विति लक्ष्यलक्षणभावः संबंधोऽनुद्योत्यो द्वितीयार्थः संबंधद्यो
तकत्वात्कर्मप्रवचनीयस्य हेतुरप्यनुद्योत्यः हेतुतृतीयाबाधकत्वात् लक्ष्यत्वं च ज्ञानजन्यज्ञानविषयत्वं जपज्ञानेन हि जपकालज्ञानद्वा
तदुत्तरकालवैशिष्ट्येन वृष्टिर्ज्ञायते अत एव नरागृष्ट इति प्रश्ने इदमुत्तरं जपाभिन्नहेतुज्ञानजन्यज्ञानविषयो वर्षणमिति बोधः लक्ष
णपदार्थलक्षणमाह हरिः आश्रितावधिभावेत्वनुलक्षणे लक्षणं विदुरिति लक्षणे लक्ष्यवस्तुप्रकाशे आश्रितावधिभावे आश्रितमर्यादा
रूपमित्यर्थः नदीमन्ववसिता सेना साहित्यरूपः संबंधोऽनुद्योत्यो द्वितीयार्थः नदीप्रतियोगिकसाहित्यवती सेनेत्यर्थः अनु हरिं सुरा
स्सावधिकअपकर्षरूपहीनत्वसंबंधोऽनुद्योत्यो द्वितीयार्थः हरिप्रतियोगिकापकर्षवंत इत्यर्थः उपहरिमित्यत्राप्येवं उप सुरान् हरिः
स्सावधिकाधिकत्वसंबंधद्योतक उपशब्दः सुरावधिकाधिकत्ववान् हरिः सममुदाहरणं तु उपखार्यां द्रोणः खार्यपेक्षयाधिकत्ववान् द्रो
णः तेनोभयमस्तीत्यर्थः वृक्षं प्रति परि अनु वा विद्योतते विद्युत् लक्ष्यलक्षणभावः प्रत्यादिद्योत्यः संबंधो द्वितीयार्थः वृक्षप्रकाशेन तत्स
मीपदेशविशेषावच्छिन्ना विद्युत् ज्ञायते वृक्षज्ञानजन्यज्ञानविषयो विद्युदिद्योतत इत्यर्थः भक्तो विष्णुं प्रति परि अनु वा विषयत्वसंबंधो द्वि
तीयार्थः तस्य भक्तपदार्थैकदेशभक्तावन्वयः विष्णुविषयकभक्त्याश्रयः भागे लक्ष्मीर्हरिं प्र॰ स्वत्ववानंशो भागः प्रतियोगित्वं द्वितीया

र्थः हरिप्रतियोगिकस्वत्ववतीलक्ष्मीः वृक्षंवृक्षंप्रतिय·सिंचति वीप्साद्विर्वचनद्योत्या वीप्सापदेनबोधयितुमिच्छाविषयं व्याप्यत्वं बुद्धिस्थ
यावत्प्रकृत्यर्थनिष्ठमुच्यते व्याप्यत्वविशिष्टवृक्षादीनां चस्ववृत्तिव्याप्तिनिरूपकत्वेनसेचनाद्यन्वयः अत्रैवप्रसादयस्तात्पर्यमाहकाः
कर्मप्रवचनीयत्वेनसंबंधपरिच्छेदकत्वात् कर्मत्वेनाविवक्षायां द्वितीया बुद्धिस्थयावद्वृक्षवृत्तिव्याप्तिनिरूपकःसेकइतिबोधः हरिम
भिवर्तते हरिसानद्वि(विवक्षायांद्विती)जन्यज्ञानविषयोऽभिमुखवर्त्तनं एवमन्यत्राभिशब्दयोगेबोधऊन्नेयः यदत्रममाभिष्यात्तद्दीयतामिति
भागे यच्छेदबुद्धिस्थत्वेनभागबोधकः मत्संबंधियत्भागकर्तृकासंभाव्यमानं एतदधिकरणिकासत्त्वात्कर्मकंप्रेरणविषयोदानमित्य
र्थः कुतोऽध्यागच्छति कुतःपर्यागच्छति द्योत्यसंबंधप्रतियोगित्वरूपकर्मप्रवचनीययुक्तत्वाभावान्नद्वितीया कुतइत्यपादानेपंचमी जि
ज्ञासाविषयापादानकमागमनमित्यर्थः सुसिक्तं क्रियापूज्यत्वहेतत्क्रियाकर्तुःपूज्यत्वेगम्ये एवकर्मप्रवचनीयत्वंनात्र· अतिदे
वान्कृष्णः उचितादधिकानुष्ठानमतिक्रमणं अधिकानुष्ठातृत्वंसंबंधः देवेभ्योऽधिकोदेवपूज्योवेत्यर्थः सर्पिषोऽपिस्यात् अपिशब्द
बलेनबिंद्वध्याहारादस्येःपदार्थद्योतकता संभावनायांलिङ् उत्करकोटिका आशंकैवसंभावना सर्पिषइत्यस्यबिंदावयववाचपवि
भावेनान्वयः बिंदुश्चाख्यातकर्त्रर्थेन्वेति अपिःक्रियायांस्वद्योत्यबिंदुदौर्लभ्यंप्रयुक्तदौर्लभ्यस्यापिद्योतकः शब्दशक्तिस्वभावात् एवं
चसर्पिरवयवबिंदुकर्तृकासर्पिर्बिंदुदौर्लभ्यप्रयुक्तदौर्लभ्यवतीतदभिन्नाएककर्तृकासंभावनाविषयासत्तेतिबोधः अपिस्तुयाद्विष्णु

संभावनायां लिङ् यसंभावनायां क्रियागतशक्यत्वस्य विषयताद्योतकोऽपिः विष्णुकर्मिका एतत्कर्तृकाशक्यत्वेन संभाव्यमानास्तुतिरिति
वोधः विष्णुविषयायाः शक्यत्वसंभावने चान्यविषयानिश्चयेन शक्येति फलति अपिस्तुयाद्वृषलं संभा॰ लिङ् क्रियागतगर्ह्यत्वद्योतकोऽ
पिः वृषलकर्मकत्वेन स्तुतेर्गर्ह्यत्वे तत्कर्तुर्गर्ह्यत्वं फलति वृषलकर्मिकास्तुतिर्गर्ह्येत्यर्थः मासमधीते अत्यंतसंयोगे व्याप्तिरूपे द्विती
या मासपदेनावयवानतिरिक्तस्त्रिंशद्दिनसमूह उच्यते व्यापकत्वं द्वितीयार्थः तत्वं च त्रिंशत्त्वावच्छिन्नप्रतियोगिव्यधिकरणासंतताभावप्रति
योगितावच्छेदकावच्छिन्नत्वे प्रतियोगिव्यधिकरणेत्युक्तेर्दिनांतरदंडाद्यवध्ययनाभावेपि न दोषः एकदिनाध्ययने च न तथा प्रयोगः
तद्घटकदिनपदेन चावयवातिरेकेण सूर्योदयावधिसूर्योदयांतरपर्यंतक्षणसमूह उच्यते एतेनैकैकक्षणव्यक्तेरपि मासत्वाधिकरणभ
या तत्र प्रतियोगिव्यधिकरणाध्ययनाभावसत्वेन वाध इत्यपास्तं मासव्यापकमध्ययनमिति वोधः दिनं स्वपितीति दिनपदमवयवानति
रेकेण त्रिंशद्दंडकूटपरं अतोनेकदंडस्वापे तथा प्रयोगः अवयवानतिरेकेणाभानेप्येकवचनांतत्वमेव शब्दशक्तिस्वभावेन तत्वेपि अव
यवगतायाः संख्यायाः समूहेनारोपात् त्रिंशत्त्वादिकं च तात्पर्यवशात्त्रिंशत्त्वादिकमेव भासते एतेनैकमासव्यापकाध्ययनस्य
त्वेपि मासांतरेऽध्ययनाभावसत्वेन मासव्यापकताया अभाने वाध इत्यपास्तं दिनव्यापकः स्वाप इति वोधः क्रोशं कुटिला नदी अत्र
पतिंवि क्रोशत्वावच्छिन्नप्रतियोगिव्यधिकरणासंतताभावप्रतियोगितानवच्छेदकावच्छिन्नत्वं कुटिलारो भासते क्रोशत्वादिकं तत्र

संख्यावद्गुणादिपरिच्छिन्नदेशत्वमेवभासते क्रोशव्यापिकेतिबोधः इतिद्वितीया रामेणबालेनहतोवाली कर्त्तरितृतीयाया आश्रयो
र्थः करणेतृतीयायाअर्थः तत्रप्रकृत्यर्थस्याभेदेनान्वयः करणस्यचस्वनिष्ठव्यापाराव्यवहितोत्तरोत्पत्तिकत्वसंबंधेनधात्वर्थफले
व्यापारेवान्वयः रामाभिन्नाश्रयवृत्तिव्यापारजन्यबाणाभिन्नकरणवृत्तिव्यापाराव्यवहितोत्तरोत्पत्तिकप्राणवियोगाश्रयोवालीति
बोधः प्रकृत्याचारुः प्रकृतिर्नामवत्वाश्रयभावीधर्मविशेषः तत्संबंधिचारुत्ववान् प्रायेणयाज्ञिकः प्रायशब्दः संभावनार्थः संभावनाविष
याज्ञिकत्ववान्प्रायेणयाज्ञिकाइत्यत्र वहवोयाज्ञिकाइत्यर्थः नाम्नासुतीक्ष्णाइत्यत्रनामज्ञाप्यतीक्ष्णत्ववानितिबोधः चरितेनदांतइत्यत्र
ज्ञाप्यत्वंतृतीयार्थः चरितज्ञाप्यदमविशिष्टः सुरथोनामराजाभूत् नामेतिप्रसिद्धौ सुरथइतिप्रसिद्धोराजेत्यर्थः एवमवच्छेदकत्वादीनांसं
बंधत्वेनविवक्षायांपरत्वेनजन्यत्वंप्रकारत्वमभावइत्यादिषुप्रकृत्यादिभ्यस्साधुत्वं इयंतृतीयाषष्ठ्यपवादः तेनसंबंधार्थत्वमस्याः गोत्रे
णगार्ग्यः गोत्रसंबंधिगार्ग्यत्ववान् सामान्यविशेषभावःसंबंधः समेनैति समदेशसंबंधिगमनं द्विद्रोणेनधान्यंक्रीणाति द्रोणद्वयपरिच्छे
द्यंतत्परिमि[illegible]ताभिन्नंवाधान्यमित्यर्थः सुखेनदुःखेनयाति सुखजनकंयानमित्यादिरर्थः अक्षैरक्षान्वादीव्यति दिवःकर्मचेतिसूत्रे
णदिवःसाधकतमस्यकर्मत्वकरणत्वोभयशक्तिमत्त्वंबोध्यतेचकारेणसंज्ञाद्वयसमावेशः तेनाक्षैर्देवयनेइत्यत्रपरत्वात्तृतीयाकर्मत्वा
त्वाकर्मकत्वप्रयुक्तपरस्मैपदाभावः फलं अक्षकर्मिकाअक्षकरणिकावाक्रीडेत्यर्थः अह्नाक्रोशेनवाऽनुवाकोऽधीतः अत्रतृतीयार्थःसंबंधः

5 क्तप्रत्ययार्थोतीतत्वं अंशे क्रियायां तिफलप्राप्तिपूर्वकत्वं च तृतीयाद्योत्यं एवं चानुवाकविषयकमहः संबंध्यतीतमध्ययनमिति बोधः तेनफ
लप्राप्तिपूर्वकस्यायोगव्यवच्छेदः पुत्रेण सहागतः पिता सह शब्दार्थः स्वसमभिव्याहृतपदार्थसमानकालिकतत्क्रियादिमत्त्वं तृतीयार्थश्च क्रिया
समभिव्याहारे सहार्थबलात्प्रतीयमानस्तत्तत्क्रियाकर्तृत्वादिकमेव इत्थं गुणे समभिव्याहारे सहार्थबलात्प्रतीयमानस्तत्र सहार्थसंबंध एव अ
प्राधान्यं च शाब्दक्रियाद्यन्वयित्वाभावः शाब्दत्वं च विवक्षाधीनं पुत्रकर्तृकागमनसमानकालिकागमनवान् पिता पुत्रेण सहोपाध्यायस्य गौः
पुत्रस्वामिकत्वसमानकालिकोपाध्यायस्वामित्ववती गौः पुत्रेण सह स्थूलः पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवानिति बोधः एते च्वागमना
दिभिः पितुः शाब्दः पुत्रस्य सहार्थबलात्प्रतीयमाने तैः संबंधात् सहार्थः इतरसंबंधं विना प्रतीयमाने चार्थस्य शाब्दत्वे तत्संबंध एव च शाब्दइत्युच्य
ते तत्र उक्तसाहित्यवाचिसहशब्दप्रयोगे शाब्दत्वरूपविशेषणाभावकृतो विशिष्टाभावः विद्यमानतावाचिसहशब्दप्रयोगे तु विशेष्याभावा
त्सः सहैव पुत्रैर्दशभिर्भारं वहति गर्दभी दशसंख्याकपुत्राणां विद्यमानत्वे पीत्यर्थः पादेन खंजः विकारप्रयुक्तत्वरूपसंबंधस्तृतीयार्थः विका
रप्रयुक्तसंस्थानवैधुर्यवत्खरवानिति बोधः कायेन दशमुखो मुखेन त्रिलोचनः इत्यादौ प्रकाशादित्वात् तृतीया अक्ष्णा काणः चक्षुर्नाशवान्स
चक्षुष्कः काणपदार्थः अक्षिपदार्थो गोलकं गोलकविकारप्रयुक्तचक्षुर्नाशवान्सचक्षुष्क इति बोधः जटाभिस्तापसः ज्ञाप्यत्वं तृतीयार्थः
जटाज्ञाप्यतापसत्ववानिति बोधः दंडेन घटः हेतुस्तृतीयार्थः हेतुत्वमखंडोपाधिः दंडाभिन्नहेतुजन्यो घट इति बोधः पुण्येन दृष्टो हरिः पु

एषस्य हृष्टेहेतुतयाऽन्वयः दर्शनविशिष्टहरेः पुण्यहेतुकत्वं दर्शनद्वारा पुण्याभिन्नहेतुजन्यो दर्शनविशिष्टो हरिरिति बोधः अध्ययनेन वसति फ
लत्वेन फलं तृतीयार्थः तत्र प्रकृत्यर्थस्याभेदेनान्वयः तस्य वासे जनकतया एवं च अध्ययनाभिन्नफलजनको वास इति बोध इति केचित् अ
ध्ययनाभिन्नहेतुको वास इति बोधः फलस्याध्ययनस्य स्वज्ञानद्वारा हेतुमिति परे अलं श्रमेण अलं शब्दो निषेधार्थः प्रविश पिण्डीमिति वद्वाक्ये
कदेशप्रयोगः तेन साध्यमित्यध्याहृत्य वाक्यार्थ उपपाद्यः शतेन वत्सान्याययति पयः शतकारणकपरिच्छेदोत्तरकालिकः पयः कर्मकवत्सनिष्ठ
पानानुकूलव्यापारानुकूलो व्यापार इति बोधः दास्या संयच्छते कामुकः दानपूर्वको भोगो धात्वर्थः दासी संप्रदानकं रतिफलकं दानमिति बोधः इति
तृतीया विप्राय गां ददाति स्वत्वे स्वत्वनिवृत्त्युभयानुकूलो व्यापारो ददात्यर्थः तदेकदेशे स्वत्वे चतुर्थ्यर्थस्योद्देश्यस्य निरूपकतयान्वयः एवं च वि
प्राभिन्नोद्देश्यविषयनिरूपितस्वत्वस्वत्वनिवृत्त्युभयानुकूलो व्यापारः गोकर्मणा आधेयत्वेन स्वत्वेऽन्वयः पत्ये शेते पत्युद्देश्यकं शयनमिति बोधः पशु
ना रुद्रं यजते फलाश्रयस्तृतीयार्थः उद्देश्यो द्वितीयार्थः पशुकरणको रुद्रकर्मको याग इति बोधः हरये रोचते भक्तिः विषयतासंबंधावच्छिन्नप्रीत्य
नुकूलस्तत्समानाधिकरणो व्यापारो रुचेरर्थः तत्फलभूतप्रीतेः समवायेनाश्रयो हरिः संप्रदानत्वशक्तिमान् चतुर्थ्यर्थः प्रीयमाण इति सूत्रात्
समवायसंबंधावच्छिन्नप्रीत्यनुकूलो व्यापारः प्रीधातोरर्थः अत एव हरिं प्रीणयतीत्यादि सिद्धिः एतदभावे हि हरौ षष्ठी प्राप्नोति शेषषष्ठ्यपवा
दः इयं चतुर्थी हरिसंप्रदानिका भक्तिकर्तृका रुचिरित्यन्वयबोधः हरिनिष्ठा या भक्तिविषया प्रीतिस्तदनुकूलो भक्तिनिष्ठो व्यापार इति यावत् अभि

6 त्नेषतेश्च विषयतासंबंधावच्छिन्नप्रीत्यनुकूलः प्रीतिव्यधिकरणो व्यापारोऽर्थ इति तस्य नरस्य चार्थत्वमिति हरिर्भक्तिमभिलष्यतीत्यादौ न हरेः संप्र
दानत्वं गोपीस्मरात्कृष्णाय श्लाघते अत्र ज्ञीप्स्यमानस्य संप्रदानत्वं श्लाघतेर्बोधविषयात्मकतिरर्थः बोधस्य फलतावच्छेदकः संबंधो ज्ञप्तितास्त
तिश्च गुणवत्वप्रतिपादककथादिप्रयोगादिरूपा स्मरादिति हेतौ पंचमी बोधाश्रयस्य संप्रदानत्वं ज्ञीप्स्यमानपदेन प्रधानभूत एवार्थकर्मणो ग्रहणं ए
वं च गोपीकर्तृका स्मरहेतुका कृष्णसंप्रदानिका अर्थात् कृष्णवृत्तिबोधविषयात्मकतिरिति बोधः स्तुतिस्त्वात्मनः परस्य वेति तु प्रकरणादिगम्यं
अत एव कृष्णाय आत्मानं परं वा श्लाघ्यं कथयतीत्यर्थ इति प्राञ्चः कर्मसंज्ञापवादोऽयं कृष्णस्यैव स्तुत्यत्वे तु परत्वात्कर्मत्वमेवेत्याहुः अन्ये त्वेवं सति
ज्ञाप्यमानत्वस्यैव बोधाश्रयस्य संज्ञासिद्धौ सनुपादानवैयर्थ्यं तस्मात् यद्विषयकज्ञानानुकूलव्यापारानुकूलव्यापारस्तस्य प्रकृत्यर्थकर्मणो ज्ञान
विषयस्य ग्रहणं तेन कृष्णविषयकं अन्यनिष्ठं यत् ज्ञानं तदनुकूलः स्मरहेतुको गोपीवृत्तिर्व्यापार इति बोधः स्तुतिश्च कृष्णस्यैवार्थात् इत्याहुः
यद्वा सन्त्वारस्याद् उभयोर्ग्रहणं तेन स्वानुरागविषयकं स्मरहेतुकं कृष्णवृत्तियत् ज्ञानं तदनुकूलो गोपीनिष्ठो व्यापार इति बोधः अनुरागस्यानुपा
दानं गम्यः स्तुसः ज्ञानाश्रयः कृष्णः संप्रदानमित्याहुः गोपीस्मरात् कृष्णाय ह्नुते बोधविषयमितरादर्शनयोग्यदेशस्थापनं ह्नोतेरर्थः आत्मानमि
त्यादेरध्याहारः सपत्नीभिया चात्मादेस्तथास्थापनं बोध्यं एवं च गोपीकर्तृका कृष्णसंप्रदानिका अर्थात् कृष्णवृत्तिबोधविषया आत्मकर्मकतथा
वस्थानानुकूला क्रियेति बोधः कृष्णायतिष्ठते स्वाभिप्रायबोधानुकूला स्थितिस्तिष्ठतेरर्थः कृष्णसंप्रदानिका अर्थात् कृष्णवृत्ति स्वाभिप्रा

यविषयकबोधानुकूला गोपीकर्तृका स्थितिरिति बोधः कृष्णाय शपते स्वाभिप्रायबोधानुकूलशपथकरणं शपेरर्थः ससत्वे शिष्येणात्म
बोधकशब्दोच्चारणं शपथकरणं कृष्णसंप्रदानकस्वाभिप्रायविषयकबोधानुकूलं गोपीकर्तृकं शपथकरणमिति बोधः यद्वा स्तुतिपू
र्वकबोधानुकूलो व्यापारः श्लाघेरर्थः स्तुसा कृष्णमात्मानुरागं बोधयति ह्नुतिपूर्वकबोधानुकूलो व्यापारो ह्नोतेरर्थः ह्नुत्वा कृष्णमात्मा
नुरागं बोधयति शपथपूर्वकं बोधनं शपेः शपथेन कृष्णमात्मानुरागं बोधयतीत्यादि बोधः प्रकृतसर्थकर्मणोऽप्राहलेतु स्तुसा ह्नुत्वा शपथेन कृष्णं
स्वसरवीजनं ज्ञापयतीत्यर्थः भक्ताय धारयति मोक्षं हरिः धृङ् अवस्थान इति धोर्णिच्यवस्थानानुकूलो व्यापारो धारेरर्थः तदर्थावस्थितसाध्य
यसंबंधी संप्रदानं धारेरुत्तमर्ण इति सूत्रात् हरिकर्तृको भक्तसंप्रदानको मोक्षकर्मकावस्थित्यनुकूलो व्यापार इति बोधः शेषषष्ठ्यपवा
दोयं अत्रोत्तमर्णो दानक्रियया धारणस्य निमित्तं यतो सो न दत्तं ददाति ददातिश्चान्यकृ यत इत्य श्रूयमाणक्रियत्वाच्छेषषष्ठी प्राप्ता सर्व
त्रविशेषविशेष्यविवक्षाया अभावे क्रियानिमित्तत्वमात्राश्रयणेन शेषत्वं प्राप्तमिति बोध्यं तदुक्तं हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारकं रु
च्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यत इति प्रेरणया भक्तसत्वे अभावात्तस्यापि प्रेरणाजनकत्वेन कारकत्वं बोध्यं ननु ऋणं नाम सजाती
यद्रव्यान्तरदानमंगीकृत्य परदत्तपरकीयद्रव्यादानं द्रव्यादानजन्योऽधमर्णनिष्ठः परिशोधननाश्योऽदृष्टविशेषो वा उभयथापि नेह प्राप्तिः
मोक्षस्योत्तरूप ऋणत्वाभावेन भक्तस्योत्तमर्णत्वाभावादिति चेन्न अवश्यदेयत्वेन तत्रापि ऋणव्यवहारात् पुष्पेभ्यः स्पृहयति स्पृहयतिरि

च्छामात्रवाची इच्छानुकूलमनःसंयोगादिरूपव्यापारवाची च फलावच्छिन्नेच्छावाची वा आद्ये स्पृहेरीप्सित इति संप्रदानत्वं तत्रेप्सितत्वं
धात्वर्थव्यापारजन्यफलाश्रयत्वं न तु फलस्य धात्वर्थत्वाग्रहः कर्मसंज्ञा तु धात्वर्थफलाश्रयस्य षष्ठ्यपवादः स्पृहेरीप्सित इति कर्मसंज्ञा
प्रयुक्तचतुर्थी पुष्पसंप्रदानिकेच्छेति बोधः अन्त्ये कर्मसंज्ञा· पुष्पाणि स्पृहयति संप्रदानत्वेनाविवक्षायां षष्ठ्येव कांतस्य स्पृहयतीति हरये कु
प्यति वधाद्यनुकूलव्यापारजनकश्चित्तवृत्तिविशेषः क्रोधः हरये द्रुह्यति दुःखजनकक्रियारूपापकारजनकश्चित्तवृत्तिविशेषो द्रोहः धा
त्वर्थोपि संगृहीतत्वादेतावकर्मकौ विषयतयैतद्धात्वर्थभूतभूतकोपसंबंधिनो हरेः क्रुधद्रुहेत्यनेन संप्रदानत्वं हरिसंप्रदानकः क्रोधः द्रोह इ
ति बोधः षष्ठ्यपवादोयं योगः हरय ईर्ष्यति हरये असूयति उत्कर्षविरोधिधर्मारोपानुकूलव्यापारजनकश्चित्तवृत्तिविशेष ईर्ष्या शौचाचा
रादिगुणविशेषविषये दंभादिकृतत्वरूपदोषारोपानुकूलश्चित्तवृत्तिविशेषो असूया एते चित्तवृत्तिविशेषरूपकोपमूलकाः प्ररूढस्य वा
कृचक्षुरादिविकारानुमेयस्य कोपस्यैव क्रोधपदार्थत्वेन तस्यापि कोपमूलकत्वे क्रुधक्रोध इति नुत हृत्ति कोपत्वसामान्यमादाय कर्मसंज्ञा
पवादे च हरिसंप्रदानकोत्कर्षविरोधिधर्मारोपानुकूलव्यापारजनकश्चित्तवृत्तिशेषो यत्किंचिद्वृत्तिः हरिसंप्रदानकशौचाचारादि दंभकृ
तमिति चित्तवृत्तिविशेषः किंचिद्वृत्तिरिति बोधः तद्धात्वर्थमूलभूतकोपविषयत्वे सति तद्धात्वर्थफलाश्रयस्यात्र संप्रदानत्वं ससेतेन भा
र्यामीर्ष्यति मैनामन्योद्राक्षीदित्यारे क्रुद्धासः मित्राय द्रुह्यति प्रतापो पीत्यादौ चेतनत्वारोपो बोध्यः द्वेषस्तु बलवत्दुःखसाधनताज्ञान

जन्यो ऽप्रीतिजनकश्चित्तवृत्तिविशेषः औषधं द्वेष्टीति यथा एतदेवाभिनंदनं तद्योगे तु नैतस्य वृत्तिः क्रुधाद्यर्थत्वाभावात् क्रूरमभिक्रुध्यति अ
भिद्रुह्यति वा अत्र यं प्रति कोपस्तत्कर्मको बोधो वसेयः कृष्णाय राध्यति ईक्षते वा अत्र प्रश्नविषय शुभाशुभपर्यालोचनं धात्वोरर्थः तदर्थ प्रश्नवि
षयसंबंधिनः कृष्णस्य राधीक्ष्योरिति संप्रदानत्वं कृष्णसंप्रदान कर्मार्थात् कृष्णसंबंधिप्रश्नविषय शुभाशुभपर्यालोचनमिति बोधः कर्मत्वः प्रश्न
विषयस्य धात्वर्थेनोपसंग्रहाद् कर्मकावेतौ विप्राय गां प्रतिशृणोत्याशृणोति वा अत्र प्रवर्त्तनाजन्यो ऽभ्युपगमो धात्वर्थः स्वार्थप्रवर्त्तनाश्रयस्य प्र
साङ्भ्यांश्रुवइत्यनेन हेतुत्वे प्राप्ते संप्रदानत्वं गोकर्मकदानविषयिणी प्रवर्त्तनेति गोः कर्मत्वं आश्रयस्य चतुर्थ्यर्थः विप्राभिन्नाश्रयवर्त्ति गोकर्मकदा
नविषयकप्रवर्त्तनाजन्योऽभ्युपगम इति बोधः प्रवर्त्तनायाश्च जन्यत्वसंबंधेनाभ्युपगमेन्वयः होत्रेऽनुगृणाति प्रतिगृणाति वा अत्र शंसनविषयहर्षा
नुकूलव्यापारलक्षणं प्रोत्साहनं धात्वर्थः शंसनाश्रयस्यानुप्रतीति संप्रदानत्वं शंसितुः प्रोत्साहने कर्मत्वेनान्वयः होतुश्च शंसितर्य भेदेनान्व
यः एवं च कर्मसामानाकारणपात्कर्मत्वे प्राप्ते इदं होत्रभिन्नशंसिकर्मकशंसनविषयहर्षानुकूलो व्यापार इति बोधः शतेन शताय वा परिक्रीतः
करणस्य पक्षे संप्रदानत्वं शतव्यापारश्च दाने शतवृत्ति व्यापारजन्यपरिक्रयविषय इति बोधः मुक्तये हरिं भजति उपकार्योपकारकभावः संबं
धस्तादर्थ्यं चतुर्थ्यर्थः मुक्तिरूपोपकार्योपकारकं हरिकर्मकं भजनमिति बोधः अयमर्थः तस्मै इदं तदर्थं तच्छब्दः उपकार्यवाची इदमर्थः उपकारकं
ततोऽन्तरपदार्थस्य कारणरूपस्य ज्ञापनीयत्वेन प्राधान्यात्तच्छब्दवाच्ये गुणे संबंध उद्भूत इति तादर्थ्यवाचकादेव चतुर्थी— ति अध्ययनाय वसति अ

4 ध्ययनोपकारको वासः कुंडलाय हिरण्यं कुंडलोपकारकं हिरण्यं सुखाय पुण्यं सुखजनकं पुण्यं नरकाय पापं नरकजनकं पापं चतुर्थ्यर्थे प्रकृत्यर्थ
स्य साक्षात्परंपरया वान्वयः मुक्तये इत्यत्र स्वनिष्ठजन्यतानिरूपितत्वरूपसाक्षात्संबंधेन ब्राह्मणाय दधीत्यादौ स्वकर्तृकभोजननिष्ठजन्यतानिरूपि
तत्वरूपपरंपरया हेतुत्वं तृतीयातादर्थ्ये चतुर्थ्याः षष्ठ्यपवादत्वेपि हेतुत्वेन बोधस्तृतीया विशेषरूपेण बोधे चतुर्थी। संबंधत्वेन विवक्षायां षष्ठी गुरो
रिदं गुर्वर्थं भक्तिर्ज्ञानाय कल्पते कृपेस्य संपत्तिरित्यर्थः प्रथमापवादः क्लृपि संपद्यमाने चेति अनेन विकारवाचका चतुर्थी। विकारे च प्रकृतिरूपारो
पः भक्तिरूपज्ञानकर्तृको संपत्तिरिति बोधः भक्तिश्च निदिध्यासनरूपा प्रकृतिविकृत्योर्भेदविवक्षायां तु प्रकृतिविकृतिभावाप्रतीते र्जनिकर्तुरि
त्यपादानत्वेन भक्तिपदात्पंचमी भक्तेर्ज्ञानं कल्पत इति ज्ञानस्य कर्तृत्वेन कारकविभक्तेर्बलवत्वेन च ततः प्रथमा भक्तिर्ज्ञानात्मना परिणमते अ
त्रात्मशब्दस्तद्वृत्तिधर्मपरः ज्ञानत्वविशिष्टरूपेण रूपान्तराप्तिर्भक्तिकर्तृकेति बोधः प्रकृतिविकृतिभावाप्रतीतेर्न चतुर्थी किंतु प्रकृत्यादित्वात्तृतीया
वातायकपिलाविद्युत् उत्पाते न ज्ञापिते चेति चतुर्थी प्राणिनां शुभाशुभसूचको भूतविकार उत्पातः ज्ञाप्यज्ञापकभावश्चतुर्थ्यर्थः वातरूपज्ञाप्य
ज्ञापिका कपिला विद्युदिति बोधः विप्राय हितं इष्टसाधनं हितपदार्थः संबंधश्चतुर्थ्यर्थः विप्रसंबंधि हितमिति बोधः विप्राय सुखं विप्रसंबंधि सु
खमित्यर्थः फलेभ्यो याति अत्राहर्तुमिति तुमुनं तादर्थ्ये कर्मचतुर्थ्यर्थः फलकर्मकाहरणफलकं यानमिति बोधः वाक्यार्थे वाक्यैकदेशप्रयो
गस्थले प्रविश पिंडीमित्यादौ यथा संपूर्णपदस्य संपूर्णवाक्यार्थे शक्तता तथास्य समुदायस्याहरणघटितोक्तार्थे शक्तिरेतच्छास्त्रबलात् स्या

निनदस्सुक्ते त्यस्य योगेनेदं अयमेवार्थाध्याहारः नमस्कुर्मो नृसिंहाय अत्र नमः स्वस्तीति तुन उपपदविभक्तेरिति द्वितीयापत्तेः नृसिंहानुकूल्यकर
णार्थो नमस्क्रियेति बोधः यागापयाति प्रातिपदिकार्थे प्रथमापवादश्चतुर्थी तुमुन्समानार्थेऽपि यत्र यागफलकं मानमिति बोधः हरये नमः अप
कृष्टत्वज्ञानबोधनानुकूलो व्यापारः स्वरादिपठितनमः शब्दार्थः तत्रापकर्षः प्रयोक्तृपुरुषविशेषनिष्ठो नमस्कार्यावधिक एव प्रतीयते व्यापार
श्च प्रयोक्तृनिष्ठः प्रतीयते शब्दशक्तिस्वभावात् अन्योच्चारितेन नमः पदमात्रेणान्यदीयनत्वबोधनात् स च व्यापारः करशिरःसंयोगादिरीदृशशब्द
प्रयोगश्च उद्देश्यत्वं चतुर्थ्यर्थः एवं च हर्युद्देश्यकः स्वकृत्सयकृष्टत्वज्ञानजनकज्ञानानुकूलो व्यापार इति बोधः एषोऽर्घः शिवाय नमः अत्र
त्यागो नमः शब्दार्थः त्यागश्च स्वस्वत्वनिवृत्त्यनुकूलो व्यापारः उद्देश्यत्वं चतुर्थ्यर्थः शिवोद्देश्यकत्यागविषयोऽर्घ इति बोधः त्यागश्च वेदबोधि
तोद्देश्यकत्वस्वप्रयोगकर्तृकत्वोपरक्त एव प्रतीयते शब्दशक्तिस्वभावात् अन्योच्चारितनमः शब्देन अन्यदीयद्रव्यत्यागाप्रतीतेः ऋत्वि
भिश्च यजमानीयतत्तद्द्रव्ये स्वीयत्वमारोप्यैव नमनः शब्दः प्रयुज्यते वेदबोधिते सूक्ते ऽन्नीचोद्देश्यके त्यागे नमः शब्दप्रयोगः अहं ममेत्यभिमा
नरहितानां शिवादीनां द्रव्ये स्वत्वाभावेऽपि शिवस्वं न प्रतिगृह्णीयादित्यादेः शिवोद्देशेन त्यक्तमिमसर्थो बोध्यः नमस्करोति देवान् उत्कृष्टनिष्ठो
त्कृः स्वनिष्ठापकृष्टत्वबोधस्तदनुकूलव्यापाररूपो नमस्कारः फलं तादृशबोधः तदाश्रयतया देवानां कर्मत्वं फलतावच्छेदकः संबंध
आश्रयता स्वशब्देन प्रयोक्ता स्वविषयापकर्षनिरूपितावधित्वसमानाधिकरणसमवायस्य फलतावच्छेदकसंबंधत्वान्न प्रसिद्धिवादेः

7 कर्मत्वं देवद्रन्ति उच्चारयितृपुरुषनिष्ठापकृष्टत्वज्ञानं तदनुकूलो व्यापार इति बोधः नमः शब्दो नियामकत्वात् द्योतकः प्रजाभ्यः स्वस्ति स्वस्ति
शब्दो मंगलार्थः संबंधश्चतुर्थ्यर्थः प्रजासंबंधिमंगलमिति बोधः स्वस्तस्तु गोभ्यः अत्र स्वस्तिशब्दार्थ एवान्वयेन चतुर्थ्येव गोसंबंधिमंग
लकर्तृकमाशंसाविषयो भवनमिति बोधः स्वाहास्वधावषट् शब्दास्त्यागार्थकनमः शेन व्याख्याताः दैत्येभ्यो हरिरलं प्रभुः समर्थः अलं
मात्रार्थः सामर्थ्यवान् मारणादिसंबंधित्वरूपः संबंधश्चतुर्थ्यर्थः दैत्यमारणादिसंबंधिसामर्थ्यवानिति बोधः न त्वां तृणाय तृणं वा मन्ये अत्र
चतुर्थीद्वितीययोः कर्म अर्थः तृणपदं तृणसदृशपरं अनादर इति मन्यकर्मविशेषणं अनादरद्योतकं पलकर्मेत्यर्थः तेन युष्मच्छब्दान्न चतु
र्थी उत्कृष्टस्यापकृष्टेनोपमानादनादरः त्वत्कर्मकतृणसदृशकर्मकमत्कृतिज्ञानाभाव इति बोधः त्वद्विशेष्यकतृणसदृशप्रकारकज्ञाने
यावत् एवं चासंतापकर्षः फलति तत्र वेषं चतुर्थी साधुः अथवा नमादियोगेन अपकृष्टनिरूपितोपमेयत्वाभावस्योपमेयेऽति तुच्छत्वबो
धनाय प्रतिपादनाद्वा अनादरः तेन तृणतुल्यमपि न मन्ये इत्यर्थः ग्रामं ग्रामाय वा गच्छति अत्र द्वितीयाचतुर्थ्योः कर्मैवार्थः ग्रामकर्मकगम
नमिति बोधः ॥ ॥इति चतुर्थी ॥ ॥ध्रुवमपाये अपादानत्वशक्तिमान् पंचम्या अर्थः साशक्तिश्च प्रकृतधात्वर्थजन्यविभागजनकव्यापा
राश्रयत्वे सति प्रकृतधात्वर्थविभागाश्रयो यस्तद्वृत्तिः ध्रुवमपाये इति सूत्रात् अपमत्रार्थः ध्रुवं स्थिरं अपायो विभागः विभागस्य
नवास्तवसंबंधपूर्वकत्वं किंतु बुद्धिपरिकल्पितसंबंधपूर्वकोपि अपायपदमावर्त्तते तस्य विभागजनको गतिविशेषोऽर्थः अधोदेश

संयोगानुकूलव्यापाररूपं पातमात्रं तु नापायः वृक्षमजहत्यपि पर्णे भूमिं स्पृशति वृक्षात्पर्णे पततीत्यप्रयोगात् गतिर्विनात्ववधिना नापाय इ
ति कथ्यते इति हरिस्वरसात् अवधित्वयोग्यविभागजनकत्वं विना सा गतिर्नापायशब्दवाच्येति तदर्थः तत्र मानमुक्तं वृक्षस्य पर्णे पतती
त्येवं भाष्ये निदर्शितमिति तत्र हि वृक्षः पर्णविशेषणमित्यपायस्याविशेषणात्षष्ठी भाष्ये उक्तेति हेलाराजः अत एव जुगुप्सापूर्वकविश्लेष
जनकनिवृत्तौ धातोर्लक्षकतामाश्रित्य जुगुप्साविरामेति वार्त्तिकप्रत्याख्यानं संगच्छते यतश्च निर्धारणमिति सूत्रप्रयोगः यतो यतो विरज्य
ते सादिप्रयोगाश्च संगच्छंते एवं च विश्लेषविशिष्टे सति यदपाये ध्रुवं गतिरूपापायानाश्रयः व्यापारतावच्छेदकसंबंधेन प्रकृतधातुवाच्य
क्रियानाश्रयस्तदपादानमिति सूत्रार्थः व्यापारतावच्छेदकसंबंधेन तद्विश्लेषजनकप्रकृतधातूपात्ततदक्रियानाश्रयत्वे सति प्रतियोगि
त्वसंबंधेन तदुपात्तविश्लेषाश्रयोऽपादानमिति फलितं कर्मवारणाय सत्यंतं अन्यथा कर्मसंज्ञाया इयमपवादः स्यात् अपायविषयेय
त्कारकं तद्रूपक्रियाजनकं तदपादानमित्यर्थसंभवात्. कर्तृसंज्ञानुपचस्यादियोगे चरितार्था वस्तुतस्तु चरितार्थत्वेपि प्रमादैः सावकाशा
याः बाधसंभवान्नदेयमेवेति तत्वं. उदासीनेऽतिव्याप्तिवारणाय विशेष्यदलं अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयत्वसमानाधि
करणेति अपादानसमभिव्याहारे विभागोपि धात्वर्थः इति भट्टाः पंचम्यर्थ इत्यन्ये ग्रामादायाति विभागपूर्वकोत्तरदेशसंयोगजनको व्यापारोऽर्थः
ग्रामाभिन्नापादानवृत्तिविभागजनको व्यापार इति बोधः धावतोऽश्वात्पतति कुड्यात्पततोऽश्वात्पततीति अत्र पततीत्युपात्तक्रियानाश्रयत्वेन

तोऽप्रस्यपादानत्वं तदुक्तं हरिणा अपाये यदु·ध्रुवमेवातदावेशादिति नचात्र पक्षे परस्परस्मान्मेषावपसरतइत्यत्र क्रियाश्रयत्वाद्दोषइतिवा
च्यं तत्र मेषयोरुपादानयोरेव क्रियाश्रयत्वं परस्परमपादानयोर्विभागाश्रयत्वमेवेत्यदोषात् अतएव चैत्रमैत्रावन्योन्यमाश्लिष्यतइत्यादौ त
योः कर्मत्वं अन्यथा परत्वात्कर्तृत्वमेवस्यात् आत्मानमात्मनेत्यादावंतःकरणाद्युपाधिकृतभेदवत् प्रकृते शब्दरूपोपाधिभेदवत् प्रकृते
शब्दरूपोपाधिभेदेनभेदः शब्दाभिलिंगितार्थस्यैवभानात् नचैवं चैत्रः स्वस्मात्पततीत्यापत्तिः स्वत्वचैत्रत्वाभ्यामुपस्थितत्वेपि चैत्रत्वस्वत्वाभ्यामे
कस्यैवोपस्थितेर्बुद्धिकृतविभागस्याप्यभावात् हरिणा तु उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थितेरित्यु
क्तं तत्र च क्रियाद्वित्वे न विभागस्य तु क्वाप्रविभागेन तद्विभागानुकूलक्रियावत्त्वस्यापरत्राभावादुभयोरप्यध्रुवत्वमिति तदर्थः इदं तेनैवमेषा
तरेत्यादिनास्पष्टीकृतं भट्टास्त्वेवं सति धावतः पततीत्यादावपादानत्वं कथमित्याशंक्य अध्रौव्यस्याविवक्षितत्वात् सतोप्यविवक्षा भवती
तिसमाधानपरभाष्यासंगति यतधात्वर्थव्यापाराश्रयत्वरूपस्यत्वदुक्ताध्रुवत्वस्यात्रासत्वेनसतोऽध्रौव्यस्याविवक्षेत्यस्यासंगतेः तस्मा
दवधिभावोपगमातिरिक्तावधित्वोपयोगिव्यापारानाश्रयत्वे सतीति वक्तव्यं अयमेव ध्रुवपदार्थः अपायेगतिविशेषे सत्युक्ताध्रुवत्ववदपाद
नमितिसूत्रार्थः इत्याहुः हर्युक्तं तन्निष्ठक्रिययोर्भेदेपि स्वधातुनानिरूपितभेदं स्वैवोक्तेरुभयोरपि तन्निक्रियाश्रयत्वे परत्वात्कर्तृत्वापत्तेरि
त्यप्याहुः वृक्षात्पर्णं पतति अत्र पतेर्विभागजन्यः संयोगोऽर्थः विभागे पंचम्यर्थो विशेषणं प्रकृत्यर्थश्च प्रत्ययार्थे वृक्षरूपापादानका वि

भागजन्यः पर्णवृत्तिः संयोगः वृक्षाद्भूमिं पर्णं पतति अत्र विभागजन्यसंयोगानुकूलो व्यापारः पतेरर्थः वृक्षापादानकविभागजन्यभूमिवृत्तिसंयोग
जनकः पर्णवृत्ती व्यापार इति बोधः वृक्षं त्यजतीत्यत्र विभागानुकूलो व्यापारोऽर्थ इति विभागाश्रयत्वात्कर्मत्वमेव भवति वृक्षात्फलं त्यजति अत्र वि
भागजन्यसंयोगानुकूलव्यापारोऽर्थः वृक्षापादानकविभागजन्यफलवृत्तिसंयोगजनको व्यापार इति बोधः स्पंदेर्नैव विभागोऽर्थ इति वृक्षः स्पंदत इ
त्येव चलते स्थासनाच्चलित इत्यादिप्रयोगादस्येव विभागार्थत्वं वृक्षाद्विभजते अत्र विभागजन्यपूर्वदेशसंयोगनाशोऽर्थः एवं पर्वतान्नदी स्यंद
त इत्यत्रापि विभागः स्यंदेरर्थः वलाहकाद्विद्योतते विद्युत् विभागजन्यसंयोगानुकूलक्रियारूपनिःसरणपूर्वकं विद्योतनं विद्योततेरर्थः वलाह
कापादानकं विभागजन्यसंयोगानुकूलक्रियोत्तरकालिकं विद्युत्कर्तृकं विद्योतनमिति बोधः इदमुपात्तविषयमपादानं ज्योतिर्धूमसलिलमरुतां संघा
तो वलाहकः अवयवभूतज्योतिषस्ततो भेदविवक्षया विभागविवक्षणात्सोऽवधिः यदा तु तेजस आधारत्वेन सा विवक्ष्यते तदा वलाहके विद्योतत
इति सप्तमी यदा त्वभेदेन विवक्षा तेजोमयत्वात्प्रकाशनसामर्थ्यमुदकधूमादेर्नास्त्यप्रकाशं प्रति बंधकत्वाविवक्षणात् तदा वलाहको विद्योतत
इति यदा तु प्रत्यक्षसिद्धमागमनं मनसि निधाय कुतो भवानिति प्रश्ने पाटलिपुत्रादिति उत्तरयति एतदपेक्षितक्रियमपादानं एतादृशस्थलेऽ
न्वयस्तु पदजन्यपदार्थोपस्थितेः शाब्दबोधानंकर्त्तनये प्रत्यक्षदृष्टस्यैवोपस्थितस्यागमनस्य मतांतरे तु प्रत्यक्षदृष्टार्थेन एकसंबंधिविधया
स्मृतपदादुपस्थितार्थस्यैवेति बोध्यं वाक्यार्थे वाक्यैकदेशन्यायेन बोध इत्यन्ये एतदभिप्रायकमेव गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिकेति

वृत्त्यासततौ तिनिर्दिष्टविषयमित्यपादानं त्रिधा अधर्माज्जुगुप्सते अत्रानिष्टसाधनताज्ञानरूपाजिह्मजुगुप्सतेरर्थः विषयता पंचम्यर्थः अ
धर्मविषयकानिष्टसाधनताज्ञानमाश्रयत्वं नीतिबोधः तादृशज्ञानपूर्वकं ततो निवर्त्तत इत्यर्थे धात्वर्थमपाय इत्यपादानत्वमिति वार्त्तिकं नारम्भं
धर्माद्विरमति प्रागभावसाधारणकृत्यभावानुकूलो व्यापारो विरमतेरर्थः योगक्षेमसाधारणी चात्रानुकूलता स च व्यापारो धर्मविषयोपेक्षा
विशेष एव धर्मविषयककृत्यभावानुकूलो व्यापार इति बोधः धर्मात्प्रमाद्यति अत्रेष्टसाधने वस्तुनि समानदेशत्व समानकालत्वोभयसंबंधेन
अधिकारविशिष्टेष्टसाधनत्वाभावज्ञानं अनिष्टसाधनत्वज्ञानं वा धात्वर्थः पंचम्यर्थो विषयत्वं ज्ञानान्वयि धर्मविषयकानिष्टताज्ञानमिति बो
धः जुगुप्सादियद्विषयकं तदपादानं धात्वर्थपूर्वकनिवृत्तिपर्यंतं धात्वर्थत्वे सूत्रेणैवापादानत्वं चोराद्बिभेति अनिष्टज्ञानं भयं अनिष्टहेतुरपादानं भी
त्रेति सूत्रात् चोरापादानकानिष्टज्ञानमिति बोधः चोरात्त्रायते अनिष्टपरिहारस्त्राणं चोरापादानकानिष्टपरिहार इति बोधः यद्वा हेतुः पंचम्यर्थः
धात्वर्थैकदेशे अनिष्टेऽन्वेति भयहेतुरित्यस्य भयैकदेशानिष्टहेतुरित्यर्थः चोरहेतुकानिष्टज्ञानं चोरहेतुकानिष्टनिवृत्त्यनुकूलो व्यापार इति बोधः
यत्त्वन्यं भयं न प्रसिद्धं ततो नैव पंचमी तत्र पंचम्याः इत्यत्वे हेतुत्वारोपेण पंचमी एवमेवांतरिक्षेन जुहोति आकाशो न पश्यति यो न पश्यति परमाणुं न प
श्यती सादेरुपपत्तिः आरोपितस्यैव निषेधात् द्वेधाच्च भयपूर्विका त्राणपूर्विका च निवृत्तिर्निवर्त्तनाच्च धात्वोरर्थः बुद्धिप्राप्तचोरापादानिका प्रत्यास
त्तातज्जयपूर्विका निवृत्तिस्तदपादानिका अनिष्टपरिहारफलिका निवर्त्तनेति च बोधः इति भाष्याल्लभ्यते हेतुत्वापादानत्वाविवक्षायां षष्ठ्यपि क

स्यविष्यतीति अध्ययनात्पराजयते क्लेशसाध्यत्वधीसमानाधिकरणोत्साहविषयकोत्साहाभावो धात्वर्थः विषयोऽत्रापादानं पराजेरिति सूत्रात् असो
ढो ग्लानिविषयः अध्ययनापादानकोऽयत्किंचित्कर्तृक उत्साहाभाववद् इति बोधः तत्पूर्विका निवृत्तिरिति भाष्यरीत्या शत्रून्पराजयते अत्र तिरस्कारानु
कूलो व्यापारो धात्वर्थः शत्रुकर्मकोऽभिभव इति बोधः यवेभ्यो गां वारयति अग्नेर्माणवकं वारयति कूपादन्धं वारयति भक्षणसंयोगादिजनकव्याप
राभावानुकूलो व्यापारो धात्वर्थः अभावप्रतियोगिव्यापारजन्यफलाश्रयोऽत्रापादानं वारणार्थानामिति सूत्रात् वारणार्थधात्वर्थफलाश्रयत्वमत्रेप्सि
तत्वं तेन भक्षणसंयोगाद्याश्रयत्वाद्यवादीनामपादानत्वं अनुकूलता चात्र योग्यतारूपैव तेन प्रतिषिद्धे गवि भक्षयत्यपि अयं वारयति तथापि
न निवर्तत इति प्रयोगसिद्धिः अत्र रत्नवारणेऽप्ययं प्रयोगः यदि दूरमागावत्तत्र गच्छन्ति ध्रुवं सर्वनाशस्तन्नाशेऽधर्मो राजभयं च बुध्वा प्राप्य निव
र्तयतीति भाष्यात् उक्तव्यापाराभावानुकूला निवर्तना च तन्मते धात्वर्थः अंतेऽभिमुखदेशगमनत्वं नांधस्य कूपपतनमिच्छाविषयः एवं नांतरीय
कविषभोजनप्रसक्तौ तद्वारणकर्तरि चैत्रे विषाद्वारयतीति प्रयोगो भवत्येव विषस्याविषत्वेनेच्छाविषयत्वाभावेऽपि भक्ष्यत्वेनेच्छाविषयत्वात् कर्तुरीप्सि
ततममित्यत्र तु तत्प्रग्रहणसामर्थ्यात्प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यफलाश्रयस्य ग्रहणमिति एवं च यवनिष्ठसंयोगजनकव्यापारस्य भक्षणा
देर्गोर्वृत्तिर्योऽभावस्तदनुकूलो व्यापार इति बोधः मातुर्निलीयते कृष्णः स्वकर्मकदर्शनाभावप्रयोजकदेशविशेषस्थितिर्धातोरर्थः धात्वर्थदर्शनकर्त्री
त्रापादानं दर्शने मातृकर्तृकत्वं प्रत्यासत्तिलभ्यं तत्पूर्वकनिवृत्तिर्धातोरर्थः तत्र मातुरपादानत्वेनान्वय इति भाष्यमतं केचित्तु पंचम्यर्थो हेतुत्वं धात्व

12 थैकदेशदर्शनेऽन्वेतीत्याहुः मातृकर्तृकस्वकर्मकदर्शनाभावानुकूलो व्यापारः तत्समवृत्तिरिति बोधः चोरान्न दिदृक्षते चोरकर्मकदर्शनेच्छाभावद्
ति बोधः उपाध्यायादधीते उच्चारणोत्तरकालिको नियमपूर्वको ग्रंथस्वीकारानुकूलो व्यापारो धात्वर्थः उच्चारणाश्रयोत्रापादानं उपाध्यायान्निःसरंतं ग्रं
थमुच्चारयति स्वीकारोतीति वा बोधः ब्रह्मणः प्रजाः प्रजायंते उपादानकारणमत्रापादानं जनिकर्तुः प्रकृतिरिति सूत्रात् प्रकृतिरुपादानकारणं ब्रह्मापा
दानिका प्रजाकर्तृकोत्पत्तिरिति बोधः ब्रह्मणो निःसरमाणा जायंत इत्यर्थः निःसरणं लोकप्रसिद्धमाश्रयं यद्यस्माज्जायते तत्ततो निर्गच्छतीति लोकव्य
वहारात् स च व्यवहारः उपादानविकारणविषय एवेति भाष्यमतं पुत्रात्प्रयोदो जायते इत्यादावुपादानत्वारोपेणापादानत्वं बोध्यं केचित्तु पुत्रादि
त्यादेर्विभाषेति योगविभागात्पंचमीत्याहुः हिमवतो गंगा प्रभवति प्रथमः प्रकाशोत्र धात्वर्थः तदाधारोत्रापादानं हिमवदपादानको गंगाकर्तृकः
प्रथमः प्रकाश इति बोधः हिमवतो निःसरमाणा प्रकाशत इति भाष्यमतं प्रासादात्प्रेक्षते ल्यवंतार्थक्रियाकर्मपंचम्यर्थः फलेभ्यो यातीत्यत्रे
व बोधः आसनात्प्रेक्षते उपवेशनस्याद्यर्थाध्याहारादधिकरणं पंचम्यर्थः प्रासादाद्धितो निःसरता चक्षुषा तत्दृत्वा वा प्रेक्षत इत्यर्थः प्रासादस्थपुरुषा
न्निष्क्रमणमेव प्रासादावधिकत्वेनोपचर्यत इति भाष्यमतं कस्मात्त्वमित्यत्र बोधस्तुवत्साहकादिस्पत्रप्रागुक्तः वनात् ग्रामो योजने योजनं वा अत्राव्यव
हितोत्तरत्वं पंचम्यर्थः स्वाव्यवहितोत्तरवृत्तित्वं प्रथमासप्तम्योरर्थः वनाव्यवहितोत्तरयोजनाव्यवहितोत्तरदेशवृत्तिर्ग्राम इति बोधः कार्त्तिक्या आग्र
हायणी मासे अत्र स्वावयवकत्वं पंचम्यर्थः स्वाव्यवहितोत्तरकालवृत्तित्वं सप्तम्यर्थः कार्त्तिक्यवयवकत्रिंशत्तिथ्यात्मकमासाव्यवहितोत्तरकालव

निराग्रहायणीति बोधः वनात्त्रिः सत्ययोजनेगते ग्राम इत्यत्र प्राप्य इत्यध्याहारेण बोधः सत्येति परावरयोगे चेति उक्त वनावधिकविभागानुकूलव्या
पारसंबंधे योजने गते ग्रामः प्राप्य इति बोधः योजनमितस्य पथमांतत्वेगतं चेदिति शेषः कार्त्तिक्या इत्यादेरर्थितत्तः प्रभृति गते मासि आग्रहायणी
त्यर्थः इति भाष्यमतं घटादन्यः स्वप्रतियोगिकभेदसंबंधः पंचम्यर्थः तेन प्रकृत्यर्थस्य अन्यस्मिन्नन्वयः घटादिन्न इत्यत्राप्येवं अन्यारादिति पंचमी घटाद्भि
न्न इत्यादौ तु ध्रुवमपाय इति अपादानत्वं सूत्रेऽपायशब्देन भेदस्यापि ग्रहणं पंचमी विभक्त इति विभक्तपदेनैव तन्मूलकसंबंधविवक्षायां घटीयो
भेद इत्यपि भिदिर्विदारण इत्यत्र भेदज्ञानविषयत्वमपि विदारणे एकत्वेन गृहीतस्य तथा बोधे बुद्धिविहारणस्य तत्रापि सत्वात् वनादारात् आरात्
दूरसमीपयोः वनसंबंधिसमीपं दूरं वेति बोधः ऋते कृष्णान्नोपयाते सुखं अत्र ऋतेशब्दार्थः संसर्गाभावः पंचम्यर्थः प्रतियोगित्वं कृष्णशब्दस्त
द्भिन्नलाक्षणिकः कृष्णभिन्नप्रतियोगिकाभावप्रयोज्यः सुखकर्तृकोत्पत्त्यभाव इति बोधः कृष्णादृते दुःखं अत्र ऋतेशब्दार्थस्य सामानाधिकरण्येने
तरत्रान्वयः कृष्णभक्त्यभावसमानाधिकरणं दुःखमिति बोधः कृष्णादृते नरः शोच्यः अत्राभाववान् ऋतेशब्दार्थः कृष्णभक्त्यभाववान्नरः शोच्य इ
ति बोधः कृष्णादृते न धनुर्धरः अत्र भेदवान् अर्थः कृष्णभिन्नो न धनुर्धर इति बोधः एतद्योगे द्वितीयापि दृशिग्रहणात् ऋते वातं वृक्षः पतति वाता
भाववान् वृक्षः पततीति बोधः वृक्षपतने वातजन्यत्वाभाव बोधस्त्वार्थः पूर्वो ग्रामात् उदयाचलसन्निहितदेशः पूर्वपदार्थः पंचम्यर्थोऽवधित्वं पूर्व
त्वं च तदपेक्षोऽखंडोपाधिः एवं परत्वाद्यपि ग्रामावधिकपूर्वत्ववानित्यादिक्रमेण बोधः परादिशब्देषु बोध्यः चैत्रात्पूर्वः फाल्गुनः अत्र प्रतियोगित्वं

सानधिकरणकालभवः पूर्वपदार्थः तत्तदवधिबोधकपदसमभिव्याहारवशाच्च तद्रूपप्रतियोगितत्ध्वंसानधिकरणकालस्य तत्वेन भानं चैत्राव
13 धिकपूर्वकालभवः फाल्गुन इति बोधः प्रतियोगितध्वंसानधिकरणकालत्वस्य शक्यतावच्छेदकत्वे गौरवं प्रत्येकखंडशः शक्तौ शक्त्यानंत्यं चैत्र
रूपप्रतियोगिचैत्रध्वंसे तदुभयानधिकरणचैत्रावधिककालभवः फाल्गुन इति बोधांगीकारे एकस्य चैत्रस्यानेकधान्वयांगीकारे गौरवमप्युस
त्तिश्च कालस्य क्रियामात्रपरिच्छेद्यत्वात् तद्भवपर्यंतं पूर्वादिशब्दानामीदृशेषु लक्षणा लक्षणाभावे तु चैत्रात्पूर्वं फाल्गुन इत्येवं प्रयोगः अस्तासा
देरध्याहारः पूर्वमित्यधिकरणशक्तिप्रधानं चैत्रात्पूर्वं माघ इत्यादौ तात्पर्यवशाद्यथायथं त्रिंशद्दिनव्यवहितस्योत्तरकालस्य तत्वेन भानं चैत्रस्य
रः अत्र तत्तदवधिसमभिव्याहारवशात् तत्तद्ध्वंसाधिकरणकालः परशब्दार्थः कृष्णात्परोऽर्जुन इत्यत्र कृष्णोत्पत्तिकालध्वंसाधिकरणकालः
परत्वेन परशब्दार्थः तत्रैव कृष्णस्यावधित्वं तथाव्यवहारात् प्रयागादुत्तरं काशीत्यादौ संयुक्तसंयोगवद्देश उत्तरत्वेन उत्तरमित्यधिकरण
शक्तिप्रधानाव्ययार्थः तस्य च पूर्वदक्षिणपश्चिमादेस्तात्पर्यवशात्तत्वेन तत्तत्प्रयोगेषु भानं गृहाद्गंगा मम परा काश्यपाः सैवापरा ममेत्यादौ
विप्रकृष्टदेशस्थः संनिकृष्टदेशस्थश्च परत्वादिना परापरशब्दार्थः अवधिः पंचम्यर्थः गृहावधिकमत्संबंधिपरत्ववती गंगेत्यादिक्रमेण
बोधः ममेत्यत्र तु न पंचमी प्रत्यासत्त्यायस्य पश्चैव यत्रोपस्थिति नाकांक्षा तद्वाचकादेव तत्पदनिमित्तविभक्तिस्वीकारात् परादिपदं चावधावेव नियना
कांक्षं संबंधिनीत्यस्पष्टमेव अवयवाचि पूर्वादियोगेऽवयविवाचकात्पंचमी तेनास्मादेयं पूर्वो भागः कायस्येति सिद्धं अवयवे पूर्वत्वं त्वव

यदंतरापेक्षया प्रथमकालोत्पत्तिकत्वेन बोध्यं पूर्वैयं चात्राइत्सारौ नूदयाचअसंनिहितत्वादिना प्राकूप्रस्य ग्वाग्रामादिसादिकं पूर्वादिशवेद्यो
ख्यातं दक्षिणाग्रामात दक्षिणाद्दिग्रामात दक्षिणस्यां दिशी सर्थे अजाही प्रस्थयो भवायप्रभृति आरभ्यवासे योहरिः अत्रप्रभृतीत्यारभ्येत्य
र्थकमव्ययं तदर्थयोगे पंचमीति सूत्रे यतश्चाध्वकालनिर्माणं ततः पंचमी कार्त्तिक्याः आग्रहायणी मासे इति वार्त्तिकप्रसारव्याख्यानाय भाष्ये उक्तं इ
दमत्रप्रयोक्तव्यं सन्न प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायणी मासे इति तेन तदर्थयोगे पंचमी विधायकवचनसत्वं सूचितं अतएव तत्प्रयोगे
पि पंचमी सिद्धिः अवधिमादाय इति तदर्थः आरभ्येत्यस्य चैतदर्थकतापि तस्यावधित्वे च समभिव्याहृतपदार्थापेक्षं यथा प्रकृते मरणांतका
लभवोऽवधिः मरणांतकालावधिं भवकालमादाय तावत्काले हरिः सेव्यः इति बोधः आरभ्येत्यस्य गृहीत्वेत्येतन्मात्रार्थकत्वे आद्यस्य णमा
रभ्येत्यादौ कर्मत्वात् द्वितीया प्रभृति शब्दस्याव्ययधातुत्वेन तदर्थस्याक्रियात्वान्न तद्विशेषणे द्वितीया तदर्थकस्यारभ्येत्यस्यापि वाक्यैकदेशा
न्वायेन तदर्थकैतेति न द्विशेषणस्य तत्वं यद्वा भवावधिके मरणांतकाले भवकालमादाय हरिः सेव्य इति बोधः तत्र गम्यमानक्रियापेक्षं भव
स्यावधित्वमित्यपादानत्वाद्वा पंचमी तच्चावधिमारभ्येत्याद्यर्थकयोगेन तद्बोधकप्रत्ययाभ्यादियोगेन च गम्यते अप्रयोगेपि वाक्यैकदेशन्या
येन तत्प्रतीतिः पंचमी बलाद्देवतात्सर्यवशाच्च एवं कार्त्तिक्याः आग्रहायणी मासे इत्यत्रापि कार्त्तिक्यवधिके आग्रहायणीघटिते मासे कार्त्ति
की माघ्रहायणनेसति आग्रहायणीति बोधः यद्वा त्वारभ्येत्यस्य प्रथमक्रियापारूपमारंभं कृत्वेत्यर्थः तत्संहार्तद्योगे सत्यपि आरभ्य तत्सांद्रस्मीनु या

14 वत्यसूत्रेणेदिति यथा ग्रामाद्बहिः बहिःशब्देन समभिव्याहृतपदार्थतावच्छेदकानधिकरणस्तत्संनिहितदेशस्तत्स्थं वस्तु च बहिःशब्देनोच्यते बहिर्योगे
पंचमीसमासविधानसामर्थ्यात्तद्योगे पंचमी बहिःशब्दं च नियतमवध्याकांक्षमिति तत्पंचम्यर्थः ग्रामत्वानधिकरणो ग्रामसमीपवर्ती ग्रामावधिको
देशस्तत्स्थं वस्तु वेति बोधः ज्ञापकसिद्धत्वे नासार्वत्रिकत्वात्करस्य गरभो बहिरिति प्रयोगोपि अपहरेः परिहरेः संसारः अत्र अप परी संसर्गाभावो
र्थः प्रतियोगित्वं पंचम्यर्थः कृष्णशब्दोत्तरपंचम्या वालिको भक्तो हरिभक्त्यभावप्रयोज्यः संसारः इति बोधः आमुक्तेः संसारः अत्र मर्यादा आङोऽर्थः
मर्यादा च द्विविधा कालरूपा देशरूपा च कालगतमर्यादात्वं च स्वस्वोत्तरकालोभयप्रागभावाधिकरणकालभावो यः समभिव्याहृतपदार्थ
स्तदनधिकरणत्वं मुक्तिपदं तत्कालपरं मर्यादा मर्यादिभावः संबंधः आङ्योगे पंचम्यर्थः आङ् मर्यादाभिविध्योरिति सूत्रस्वरसात् मुक्ति
मर्यादकः संसार इति बोधः संसारे मुक्तिकालप्रागभावाधिकरणनिरूपिततद्भिन्नकालावृत्तित्वविशिष्टव्यापकता बोधस्तत्वार्थः एतदर्थद्योत
कया च न्यूनयोगे तु तत्तोन्यत्रापि दृश्यत इति द्वितीया कार्त्तिक्या वैशाखीं यावच्छीतमिति यथा कार्त्तिक्या इति पंचमी तु प्रभृत्यर्थयोगे कार्त्तिकी
प्रभृति वैशाखीमर्यादकं शीतमित्यर्थः शीते कार्त्तिक्यादि वैशाखीपूर्वतिथ्यंतकालनिरूपिततद्भिन्नकालावृत्तित्वसमानाधिकरणव्यापकता
बोधस्तत्वार्थः व्यापकत्वमन्यत्रोक्तं दिशोऽप्येवं केचित्तु कार्त्तिकीपूर्वकालोत्तरचैत्रोत्तरकालपूर्वकालव्यापकत्वं चैत्रोत्तरकालावृत्तित्वसहितं शीतभुव
ने बुध्यते इत्याहुः प्रयागात्प्रभृति आकाश्याः इत्यादौ देशमर्यादा देशगतमर्यादात्वं च स्वस्वोत्तरदेशयोः प्रयागगंगाद्यंतरालदेशत्व

तिसमभिव्याहृतपदार्थरूप्याद्यनधिकरणत्वं प्रयागादिकाशीमर्यादकवृष्टिकर्त्ता देव इति बोधः एवं प्रयागादिकाशीपश्चिमदेशनिरूपितस्व
भिन्नावृत्तित्वसमानाधिकरणव्यापकता बोधस्त्वार्थः आसकलाद्ब्रह्म आङ् योसोऽभिविधिरूपःसंबंधः पंचम्यर्थः मर्यादीभूतविशिष्टाभिव्या
प्तिरभिविधिः सकलव्यापकं ब्रह्मेति बोधः अभिविधिरपि द्विविधः कालिको दैशिकश्च आद्यो यथा कार्त्तिक्याश्चैत्रं यावच्छीतं कार्त्तिकीप्रभृति
चैत्रांतकालव्यापकं शीतमिति बोधः चैत्रपदं तदंतकालपरं अंत्यो यथा काशीतः पाटलिपुत्रं यावद्वृष्टो देवः काशीप्रभृतिपाटलिपुत्रांतदेश
व्यापकत्वं एवं प्रतीयते अनयोस्तात्पर्यवशात्कदाचिद्व्यापकत्वं तद्भिन्नकालावृत्तित्वविशिष्टं तद्भिन्नदेशावृत्तित्वविशिष्टं च प्रतीयत इति बो
धं प्रद्युम्नः कृष्णात्प्रति सदृशः प्रत्यर्थः कृष्णसदृश इति बोधः प्रतिनिधिप्रतिदानशब्दौ कर्मणि भावव्युत्पन्नौ तौ प्रतिनिधिप्रतिदाने यत्र प्रतियो
गिकप्रतिनिधित्वप्रतिदानकर्मत्ववती ततः कर्मप्रवचनीययुक्तात्पंचमी भावव्युत्पन्नौ तावित्यस्मे प्रतिनिधित्वं सादृश्यं तिलेभ्यः प्रतियच्छ
ति माषान् अत्र ग्रहणपूर्वकं प्रत्यर्पणं प्रतिसमभिव्याहृतयच्छतेरर्थः तिलग्रहणपूर्वकं माषकर्मकं प्रतिदानमिति बोधः शताद्बद्धः हेतुहेतुम
द्भावः पंचम्यर्थः शतहेतुकबंधनकर्मेति बोधः जाड्याद्बद्ध इत्यत्रापि बोध्यं धूमादग्निमान् अत्र धूमपदं स्वज्ञाने अग्निमत्पदं स्वज्ञानविषय
ये लाक्षणिकं ज्ञाननिष्ठजन्यजनकभावस्य विषये आरोपः धूमज्ञानहेतुकज्ञानविषयो वह्निमानिति बोधः नास्ति घटोऽनुपलब्धेः अत्र सर्व
त्र बाहुलकं प्रमाणनेत्तनुदृष्टेरिति भाष्यप्रयोगज्ञापितेन विभाषेति योगविभागेन पंचमी उपलब्ध्यभावहेतुकघटकर्तृकसत्ताऽभाव इति वा आरो

15 पिता सत्तेति वा बोधः पृथक् विना नाना रामात् रामं रामेण वा पंचम्यादीनां प्रतियोगित्वमर्थः पृथक्त्वं गुण इत्येके भेद इत्यन्ये भेदार्थत्वे इमौ भ्रातरौ
पृथक् जाताविति व्यवहारो गौणः विनानाशब्दौ ऋतेशब्दसमानार्थौ नात्स्यते सुखं रामेण विनानामित्यादौ रामभिन्नस्य भावस्य योग्यः सुखकर्तृको
त्पत्त्यभाव इति बोधः रामं विना न धनुर्धर इत्यत्र भेदवानर्थः रामभिन्नो न धनुर्धर इति बोधः रामं विना नरः शोच्य इत्यत्राभाववानर्थः रामभिन्नाय
भाववान्नरः शोच्य इति बोधः एवं नानाशब्दार्थोपि स्तोकेन स्तोकाद्वा मुक्तः करणमत्र तृतीयापंचम्योरर्थः स्तोकशब्दः स्वप्रवृत्तिनिमित्तात्मत्व
परः शुक्लादिवदेते धर्मपरा अपि एवं चासत्ववचनता सत्वत्वं च सर्वनामपरामर्शयोग्यत्वं करणत्वं च तस्य परंपरया ईदृशार्थ एव साधुत्वं
करणे च स्तोकाल्पेति सूत्रबलात् अत्र तृतीयापंचम्यो अल्पत्वकरणकमुक्तत्वाश्रय इति बोधः एवमेव कृच्छ्रादिशब्दयोपि बोध्यं ग्रामस्य दूरा
त् दूरेण दूरं वा गतः अत्र पंचम्यादयः प्रातिपदिकार्थे दूरदेशवृत्तिदूरशब्दार्थः षष्ठ्यर्थः संबंधः ग्रामसंबंधिदूरदेशवृत्तिगमनमिति बोधः
एतेन ग्रामस्यांतिकात् अंतिकेन अंतिकं गतमित्यादि व्याख्यातं समीपदेशवृत्ति अंतिकशब्दार्थः ग्रामसंबंधिसमीपदेशवृत्तिगमनमि
ति बोधः ॥ ॥इति पंचमी ॥ ॥संबंधः षष्ठ्यर्थः स च संबंधत्वेन तत्तद्रूपेण च स्वस्वामिभावादिः संबंधः संबंधत्वेन क्रियाकारकभावश्च अत
एवानेकसंबंधसत्वेपि स्वत्वादिसंबंधविशेषतात्पर्येण चैत्रस्य नेदं वास इति प्रयुज्यते द्वितीयादितश्च क्रियाकारकभावस्य तत्तद्रूपेणैव बो
धः तथैवानुभावात् मातुः स्मरतीत्यादौ च तत्तद्रूपेण बोधे द्वितीयादीनां बाधकानां सत्वात्संबंधत्वेनैव बोधः मातृसंबंधि स्मरणमिति बोध

इति वक्ष्याः प्रोचस्तत्रापि क्रियाकारकभावमूलकं विशेषणत्वरूपं विषयत्वमेव निमित्तत्वमेव वा तत्त्वेन संबंधत्वेन वा विवक्षितं अत एव हरि
णा संबंधः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः श्रुतायामश्रुतायां वा क्रियायामभिधीयते इति क्रियाकारकत्वपूर्वकत्वमेव संबंधस्योक्तं क्रिया
कारकसंबंधः कारणं शेषसंबंधस्तु फलभूतः यथा राज्ञः पुरुष इत्यत्र राजपुरुषयोः कर्मसंप्रदानरूपो अभूत् राजा पुरुषाय ददातीति तन्मूलकस्व
स्वामिभावप्रतीतौ कर्मादिविशेषरूपतानवगमः कारकशब्देन च हरिश्लोके करणत्वादिशक्तयः उच्यन्ते अत्राश्रूयमाणदानादिक्रियासंबंध
लक्षणकार्यानुपपत्त्याऽनुमीयमाना संनिहितेति तन्मुखेन समन्वयः सिद्धस्वभावानां द्रव्याणां क्रियां विना परस्परसंबंधाभावात् क्रिया हि
निश्रयणीव संबंधं करोति एवं च संबंधिनोरप्यनुमीयमानक्रियानिमित्तत्वरूपं कारकत्वमस्ति मातुः स्मरतीति श्रुतायां तत्र हि क्रियाकर्मत्व
मूलक उक्तः संबंधः सामीप्याद्यपि बुद्धिस्थैकदेशाधिकरणकस्थितिक्रियाकर्तृत्वनिमित्तकमित्यायूह्यं अत एव पर्वतस्य वृक्षा इति न वृक्षप
र्वतयोराधाराधेयभावमूलकसंबंधाभावात् संयोगो हि नाधाराधेयभावमूलकः विपरीतं आधाराधेयभावस्यैव तन्मूलकत्वात् किंचि
संयोगो न संबंधः संबंधस्य पदार्थयोजनामात्रहेतुत्वात् संयोगस्य स्वतः पदार्थत्वात् सांसर्गिकविषयतया तस्याभानाच्च संबंधश्च षष्ठ्या
दिभिरेवोच्यते संबंधपदेनापि सांसर्गिकविषयतावत्त्वेन नोच्यत इति संबंधः सर्वथा पदागम्यः संयोगस्तु न कदापि षष्ठ्यादिभिस्तया विषयत
यो च्यते इमौ संयुक्ताविस्यैव तत्र व्यवहारात् तत्र संबंधव्यवहारस्तूभयाश्रितत्वरूपसंबंधधर्मवत्त्वाद्गौणः अत एव मनुष्यत्त्रे वृक्षवान्

16 पर्वत इत्याद्यर्थे सप्तम्युपादानं गोमान् देवदत्त इत्याद्यर्थे च षष्ठ्युपादाननिमित्ति भाष्ये उक्तं षष्ठ्यर्थश्च सांसर्गिकविषयतयैव भासते अत एव षष्ठी
शेष इति सूत्रे भाष्ये राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुषो विशेष्य इत्युक्तं अन्यथा संबंधं विशेष्यतया विशेषणतया वा ब्रूयात् इत्याहुः राज्ञपुरु
षः अत्र स्वस्वामिभावः षष्ठ्यर्थः स च स्वत्वस्वामित्वसमूहरूपः यत्तु स्वामित्वं स्वत्वं वा षष्ठ्यर्थ इति तन्न तस्यैकमात्रवृत्तितया संबंधत्वायोगा
त् संबंधो हि संबंधिभ्यां भिन्नः उभयसंबंधी न च तदप्येकत्राश्रयतया परत्र निरूपकतयास्त्वेवेति वाच्यं। निरूपकत्वस्य वृत्त्यनियामकत्वेनोभय
त्र संबंधवत्त्वप्रतीत्यनापत्तेः उक्तं च हरिणा द्विष्ठोप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते तत्राभिधीयमानश्च प्रधानेप्युपयुज्यते इति परार्थत्वाद्गु
णानां परं प्रति विशेषणत्वेन विवक्षितत्वादित्यर्थः अयं भावः भेदसति विशेषणतया विवक्षितस्य संबंधं विना विशेषणत्वासंभवेन तदाकांक्षि
तत्वाद्विशेषणे संबंधो व्यतिरिच्यते उद्भूततया भासत इति तत्रैव षष्ठी विशेष्यस्य तु पदांतरासमभिव्याहारे स्वार्थनिरूपितविशेष्यत्वेन भासमान
त्वरूपस्वनिष्ठत्वादेव न विशेष्यतानियामकसंबंधाकांक्षा तत्र विशेषणे शब्देन षष्ठ्यादिना अंशेन प्रतीयमानः प्रधानेप्युपयुज्यते तस्य हि पुत्व
स्वभावत्वात् राजादिनिरूपितविशेष्यताख्या राजादिपदसन्निधाने प्रतीयमानाख्या उपकारको भवतीत्यर्थः राज्ञ इत्यादेरन्यपदांतरसमभिव्याहारं वि
नाप्यध्याहृतसंबंधिसामान्यनिरूपितविशेषणत्वप्रतीतिरिति विशेषः राज्ञ इति हि स्वामित्वमवगम्यमानमन्यथानुपपत्त्यैव पुरुषे स्वत्वम
वगमयति अतः संबंधस्य बहिरंगत्वात् पुरुषादेरंतरंगा प्रथमैव एवं च राजस्वामिकमिति ततो बोधः अत एवाग्रे वक्ष्यति इति विशेषजिज्ञासापुरु

वादिपदैश्चतन्निरस्तिः एवं च सर्वत्र संबंधिद्वयभिन्नधर्मसमूहः संबंधिनो भेदे संबंधः स्पष्टं चेदं यस्मादधिकमिति सूत्रे भाष्ये अत एव स्वस्वामिभा
वोऽवयवावयविभाव आधाराधेयभावः प्रतियोग्यनुयोगिभावो विशेषणविशेष्यभावः संबंध इत्यादिर्व्यवहारः तत्राभावप्रतियोगिनोः प्रतियो
ग्यनुयोगित्वसमूहः संबंधः घटाभावभूतलयोस्त्वाश्रयाश्रयिभावः एवं कालादिभिरपि एवं च षष्ठ्याः संबंधो विशेषणत्वं चार्थ इति विशेष
णादेव षष्ठी अत एव राज्ञः पुरुष इत्यत्र राजपदसंनिधाने प्रतीयमानं पुरुषे विशेष्यत्वरूपमाधिक्यं वाक्यार्थः राज्ञि प्रतीयमानं तत्प्रति द्वंद्वि वि
शेषणत्वं तु पदांतरासमभिव्याहारेपि राज्ञ इत्येतावन्मात्रेण प्रतीतेः षष्ठ्यर्थ इत्युक्तं षष्ठी शेष इति सूत्रे भाष्ये यदा तु पुरुषस्य विशेषणत्वविवक्षा त
दा पुरुषस्य राजेत्यपि बोध्यं ननु मम भ्रातेत्यादौ कः षष्ठ्यर्थः एकस्माज्जन्मेति चेत् एवं तत्र स्याने[illegible]तानां पांथानामपि संबंधापत्तेरिति चेत् सत्यं ए
कोदरशायित्वमात्रेण व्यवहारनियामकः कात्स्न्यनिकोऽवयवावयविभाव इत्यदोषात् एतेन सामानाधिकरण्यं न संबंध इति सूचितं एधोद
कस्योपस्कुरुते गुणाधानं धात्वर्थः काष्ठकर्मकमुदकसंबंधिगुणाधानं इति बोधः भजे शंभोश्चरणयोः शंभुचरणसंबंधी प्रीत्यनुकूलो व्यापार इ
ति बोधः फलानां तृप्तः करणत्वस्याविवक्षा फलसंबंधितृप्त्याश्रय इति बोधः अन्नस्य हेतोर्वसति हेतुहेतुमद्भावः षष्ठ्यर्थः हेतुशब्दोत्तरैवतास
र्यमाह कः स्वनिष्ठजनकतानिरूपितजन्यतासंबंधेनेतरान्वये षष्ठी षष्ठी हेतुप्रयोग इति सूत्रात् अन्नहेतुको वास इति बोधः हेतुत्वेनान्यत्रा
न्वयाभावादन्नं हेतुं यशेषे सत्त्वेन षष्ठी निमित्तार्थकशब्दप्रयोगे सर्वाः विभक्तयः प्रयोक्तव्याः किं निमित्तं वसति किमिति प्रथमांतं द्वितीयांतं च जि

स्नाता विषयनिमित्तको वा सङ्कृतिवोधः एवं सर्वविभक्तिषु वोध्यमुह्यः असर्वनाम्नः प्रथमाद्वितीयेन भवतः स्नानेन निमित्तेन हरिसेव्यः स्नानाभिन्ननि
मित्तकसेवाविषयो हरिरिति वोधः ग्रामस्य दक्षिणतः पुरः पुरस्तात् उपरि उपरिष्टात् दिशि दृष्टाभ्यां दिग्देशकालवृत्तिभ्यां प्रथमासप्तमीपंचम्यंता
भ्यां दक्षिणोत्तराभ्यां स्वार्थे ऽतसुच् ग्रामसंवंधी दक्षिणः दक्षिणे दक्षिणात् इत्यादि वोधः दक्षिणेन ग्रामं ग्रामस्य वा ग्रामसंवंधि दक्षिणदेश इत्यादि
रर्थः एवमुत्तरेण दूरं निकटं ग्रामस्य ग्रामाद्वा ग्रामसंवंधि दूरदेशवृत्ति समीपदेशवृत्ति वा वोधः सर्पिषो ज्ञानं जानातेः प्रवृत्तौ लक्षणा सर्पिः सं
वंधिनी प्रवृत्तिरिति वोधः मातुः स्मरणं मातृसंवंधि चिंतनं इत्यर्थः सर्पिषो दयनं सर्पिः संवंधि दानमित्यर्थः सर्पिष ईशनं सर्पिः संवंधि ऐश्वर्यमित्कु
लो व्यापार इत्यर्थः एधोदकस्योपस्करणं उदकसंवंधि गुणाधानकरणमेध इति वोधः सकारांतं क्लीवमेधः चौरस्य रोगस्य रुजा रोगकर्तृकार्द
चौरसंवंधिनी रुजेति वोधः सर्पिषो नाथनं सर्पिः संवंधि आशासनं चौरस्योज्जासनं चौरसंवंधि ताडनमिति वोधः चौरस्योन्नाटनं चौरसंवंधि
अवस्पंदनं चौरस्य क्राथनं चौरसंवंधि हिंसा वृषलस्य पेषणं वृषलसंवंधि चूर्णनं शतस्य व्यवहरणं पणनं वा शतसंवंधि द्यूतं क्रयविक्रयव्यवहा
रो वा शतस्य दीव्यति शतकर्मकं द्यूतमिति वोधः अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य छागावयवीभूतवपासंवंधि हविर्भूतमेदः कर्मकं प्रेरणा
विषयः प्रेषणमिति वोधः इष्यतेर्दैवादिकस्य लोण्मध्यमपुरुषैकवचनं प्रेष्यति ब्रुविरपि तथैव साहचर्यात् पंचकृत्वोह्नो भोजनं अह्नः संवंधि पं
चावर्तिकं भोजनं कृष्णस्य कृतिः कृष्णकर्तृका कृतिः जगतः कर्ता कृष्णः जगत्कर्मकव्यापाराश्रयः कृष्ण इति वोधः नेताश्वस्य स्रुघ्नस्य स्रुघ्नं वा

स्तुघ्नानुयोगिकाष्ठप्रतियोगिकसंयोगानुकूलव्यापारानुकूलो व्यापार इति बोधः कृतपूर्वीकटं अत्र कर्तृकर्मणोरिति न षष्ठी कृतीत्येतत्सामर्थ्यात्
कृदन्तशक्तिज्ञानसहकारेणोपस्थितकृत्प्रकृत्यर्थक्रियायाः कर्तृकर्मणोः षष्ठीति तदर्थात् अन्यथा निष्ठायोगेन निषेधेन कृद्योग एव षष्ठी सिद्धौ तद्वैयर्थ्यं
स्पष्टमेव अहकृते च कृत इत्यत्र न कर्मणि क्तः द्वितीयापत्तेः किंतु पूर्वांशे आहार्याभावारोपमात्रेण धातोरकर्मकत्वं स्वीकृत्य भावे क्तः यद्वा कर्मवि
शेषस्य न तत्र रूपेण प्रागन्वयाविवक्षया अकर्मकत्वाद्भावे क्तप्रत्ययः स च कृतपूर्वी अधीती इत्यादिवृत्तिविषय एव तदुक्तं भाष्ये यदा वाक्यं न तदा प्र
त्ययः यदा प्रत्ययः सामान्येन न तदा वृत्तिरिति न तदा प्रत्ययः न तत्र भावे प्रत्ययः सकर्मकत्वात् यदा प्रत्ययः भावे इति शेषः तदा वृत्तिः तदा वृत्ति
रेव सा च न कदापि कर्मण्यन्तेनेत्याह सामान्येनेति उक्तरीत्या कर्महीनार्थकधातुप्रकृतिकक्तान्तेनेत्यर्थः अनेन नञ्दृशान्तस्य वाक्ये न प्रयो
ग इति स्पष्टमेवोक्तं किं च योसौ कृतकटयोरभिसंबंधः सामानाधिकरण्यरूपः स उत्पन्नेन तद्धितप्रत्ययेन निवर्त्तते इत्युक्तं भाष्ये उक्तं तेन तद्धिते अ
कृते हि कृतः कट इत्येवेति ध्वनितं ततः पूर्वं कृतमनेनेत्यर्थे पूर्वादिनिरिति तद्धिते कृते पश्चात्कर्मत्वस्याश्रयाकांक्षायां कटमित्यादेर्विशेषक
र्मणोऽन्वयः एतेनासामर्थ्यात्तद्धितो न स्यादित्यपास्तं तदुत्पत्तिकालेऽसामर्थ्याभावात् तत्कारकान्वयोगुणीभूतक्रियायामपीति स्पष्टमेव
इदं तु फलितं कृधातुक्तप्रत्ययपूर्वशब्दइनिप्रत्ययशक्तिज्ञानसहकृततद्धितान्तशब्देनैव पूर्वकालक्रियाकर्तृणां परस्परविशिष्टानां बोधो
न तु कृदन्तशक्तिज्ञानमपि तत्र सहकारि एतद्वृत्तिभिन्नस्थले कृत्प्रत्ययान्तरस्य क्तस्य भावार्थकत्वाभावेन तदन्तमात्रस्य पृथक् शक्तिरहेमा

नाभावात् चतुर्णामिकार्थाभावे द्वयोरपि सोऽस्त्येवेति नात्र कृतोऽसाधुत्वं तंडुलानां पाचकतर इत्यादौ तु न दोषः तत्र याचकादिशक्तिज्ञानसहका
18 रेणैव समुदायादुपस्थितेः एतेन कृद्ग्रहणाभावेपि अत्र निष्ठांतत्वेन षष्ठीनिषेधेन षष्ठ्या प्राप्तिरिमा यास्तु निष्ठांतपदशक्तिज्ञानसहकारेणोप
स्थितक्रियान्वयिनोरेव तेन निषेधात् आश्चर्यो गवां दोहो ऽगोपेन आरोपितगोरसभक्ष्यवद्भिन्नैश्रयस्त्री गोकर्मकोऽद्भुतव्यापारविभागानु
कूलो व्यापार इति बोधः भेदिका विभित्सा वा रुद्रस्य जगतः धात्वर्थनिर्देशे ण्वुल् तृच् कर्तृकं जगत्कर्मकं विदारणं भेदनेच्छा वेति वा विचित्रा
जगतः कृतिर्हरेर्हरिणा वा हरिकर्तृका जगत्कर्मिका कृतिः शब्दानामनुशासनमाचार्येणाचार्यस्य वा असाधुप्रतियोगिकभेदवत्त्वेन
बोधनं धात्वर्थः असाधुभ्यो विविच्य बोध्यंते येनेति करणे ल्युट् आचार्यकर्तृकं असाधुशब्दप्रतियोगिकभेदवत्साधुशब्दविषयकज्ञाप
नकरणमिति बोधः एतां मतः राजकर्तृकेच्छाविषयः बुद्धः पूजित इत्यनयोरप्येवं मतिबुद्धीति क्तः इदमेषां शयितं एतत्कर्तृकं शयनं शय
नाधिकरणं वा सकर्मकेभ्यस्त्वधिकरणे क्तः द्वयोरपि कर्तृकर्मणोः षष्ठी द्वयोरप्यनभिहितत्वात् इदमेषां भुक्तमोदनस्य उभयप्राप्ताविति तु
मध्यपठितत्वात्कर्तृकर्मणोरित्यस्यैव नियमः एतत्कर्तृकं ओदनकर्मकं यद्भोजनं तदधिकरणमिति बोधः सृष्टिं कुर्वन् कुर्वाणो वा हरिः सृ
ष्टिकर्मकक्रियाकर्ता हरिः हरिं दिदृक्षुरलंकरिष्णुर्वा हरिकर्मकदर्शनेच्छाकर्ता अलंकर्ता वा दैत्यान् घातुको हरिः दैत्यकर्मकहननकर्ता
हरिः लक्ष्म्याः कामुकः लक्ष्मीविषयकेच्छावान् हरिः जगत्सृष्ट्वा विहरति जगत्कर्मकसृष्ट्युत्तरकालीनं सृष्टिकर्तृकर्तृकं विहरणं तत्कर्ता सुखं

कर्तृदुःखं संपादयति सुखकर्मकक्रियाफलकं दुःखकर्मकं संपादनं दैत्यान् हतवान् दैत्यकर्मकहननकर्त्ता विष्णुना हताः दैत्याः विष्णुवृत्तिव्या
पारजन्यप्राणवियोगाश्रयाः दैत्याः ईश्वरः प्रपंचो हरिणा हरिकर्तृकानायाससाध्यक्रियाविषयः प्रपंच इति बोधः सोमं पवमानः सोमक
र्मकयावनकर्त्ता आत्मानं मंडयमानः आत्मकर्मकभूषणकर्त्ता वेदमधीयन् इडु धार्यो रिति शाता वेदकर्मकाध्ययनकर्त्ता लोकान् कर्त्ता लोक
विषयककृत्याश्रयः मुरस्य मुरं वा द्विषन् मुरविषयकद्वेषाश्रयः सतः पालकोचतरति सत इति द्वितीया सत्कर्मकपालनकर्तृकर्तृकं व्रजनं
व्रजंगामी व्रजकर्मकगमनकर्त्ता शतंदायी शतकर्मकदानकर्त्ता मया मम वा सेव्यो हरिः मत्कर्तृकसेवाकर्म हरिः गेयो माणवकः साम्नो सा
मकर्मकगानकर्त्ता माणवकः नेतव्याः व्रजं गावः कृष्णेन व्रजकर्मकसंयोगजनकः कृष्णवृत्तिव्यापारजन्यव्यापाराश्रयाः गावः कृष्णेन कृष्ण
स्य वा सदृशः कृष्णप्रतियोगिकसादृश्यवान् एवं तुल्यसमशब्दयोगेपि तुला उपमा वा कृष्णस्य नास्ति तुलोपमाशब्दौ कर्मसाधनौ न तु भाव
करणसाधनौ तेन सादृश्यानुयोगिवाचकतुल्यशब्दसमानार्थावेतौ कृष्णप्रतियोगिकसादृश्यवदभाव इति बोधः स्फुटोपमं भूतिसितेन सा
ह्वावुपमाशब्दो भावसाधनः कर्मसाधनो वास्तु अतुलोपमाभ्यामिति पर्युदासात् तृतीया न प्राप्नोति तथापि विनापि तद्योगमिति सह युक्ते तृतीया
एवं तुलां यदारोहति दंतवाससेस्य त्रापि बोध्यं आयुष्यं कृष्णाय कृष्णस्य वा भूयात् कृष्णसंबंध्यायुष्यकर्मिका आशीर्विषया सन्त्वेति बोधः॥ ॥
इति षष्ठी॥ ॥अधिकरणे सप्तम्याः आश्रयोर्थः स च कर्तृकर्मद्वारा क्रियाश्रयः नदुनं हरिणा कर्तृकर्मव्यवहितामसाप्त्साद्वारयक्रियां उप

17 कुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति लोकस्य गुणक्रियाविषयमधिकरणं न शास्त्रे कारकाधिकारात् क्रियाविषयमेव तत् साक्षा
त्क्रियाश्रये कर्तृकर्मसंज्ञे बाधिकेऽतः कर्तृकर्मव्यवहितामिति यद्यपि साक्षात्क्रियाधारः कारकं तथापि कारकाधिकारे प्रकर्षयोगो नाश्री
यत इति परंपरया आधारस्यापि ग्रहणं व्यवहितामित्युक्तेऽपि असाक्षादित्युक्तिर्लोकानुसारेणान्वयोऽपि परंपरयैवेति सूचनाय कटे आ
स्ते स्थाल्यां पचतीत्यादावधृते कर्तृकर्मणी क्रियां न संपादयत इत्यधिकरणं क्रियाधारमुपकुर्वत्तस्यां क्रियामुपकरोतीत्यर्थः यद्यपि वि
क्लित्तिरूपकर्मद्वारा फलाश्रयत्वं तण्डुलादेरस्ति तथापि व्यापारजन्यफलाश्रयत्वसत्त्वेन परया कर्मसंज्ञया बाधान्न सप्तमी यद्यपीच्छाभ
वति मोक्षस्येत्यापत्तिस्तथाप्यंतरंगत्वेन परत्वेन च कर्मत्वमेवेति न दोषः एवं च मोक्षे इच्छास्तीत्यादौ प्रत्ययोपात्तसिद्धेच्छाद्वाराऽस्ति क्रियायामन्व
यस्य विवक्षितत्वे नाधिकरणत्वं प्रकृत्यर्थसाध्यभूतेच्छाद्वाराऽस्तिक्रियान्वये तु कर्मत्वात् षष्ठ्येव भवतीति बोध्यं अधिकरणं त्रिधा औप
श्लेषिकं वैषयिकं अभिव्यापकं चेति तदुक्तं हरिणा उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु उपकारास्तु भिद्यन्ते संयोगिसमवायिनां अवि
नाशो गुरुत्वस्य प्रतिबंधे स्वतंत्रता दिग्विशेषादवच्छेद इत्याद्यादेह हेतवः इति औपश्लेषिकवैषयिकाभिव्यापकेषु त्रिष्वप्युपश्लेषोऽस्त्ये
व उपकारः संवंधस्तु भेदाभिन्नत्वेन व्यवहारः कटे आस्ते इत्यादौ संयोगिन्याधारे कतिपयावयवव्याप्त्येव संबंधः तिलेष्वित्यादौ समवायि
नि सकलावयवव्याप्त्या संबंधः खे शकुना इत्यत्र आकाशस्य त्वावयवाभावेन कल्पितदेशत्वं वैषयिकत्वं कल्पितदेशापेक्षया चा

त्राप्युक्ताऽन्यतरस्उपश्लेषः गुरौ वसतीत्यत्र शिष्यस्य गुरुर्नधीनायां वृत्तौ वैषयिकमधिकरणं गुरुः उपश्लेषोऽत्र बोद्धः। युद्धे संनह्यतीत्यत्र युद्धोद्देशे
न कवचादिसंनहनप्रवृत्तेर्युद्धं विषयः गंगायां घोष इत्यत्र गंगाशब्दः सामीप्यादुद्देशवृत्तिरिति औपश्लेषिकमेव अत्र गंगायां सामीप्यादुद्देशवृ
त्त्याधिकरणत्वारोपो बोध्यः उपकारानाह अविनाश इत्यादि अविनाशस्तिलवृत्तउपकारस्तैलस्य तिलविशेषोऽहि तैलं विकीर्णं नस्पेत्
पर्यंके शेत इत्यादौ शयितृगुरुत्वस्य प्रतिबंधे न पर्यंकस्य स्वत्वेन तत्रोपकारः खे शकुना इत्यादौ दिग्विशेषसंबंधात्तत्परिवर्त्तनमुपकारः
गुरुत्वाशिष्यसंस्कारः इत्यादय उपकाराः बोध्या इति हेलाराजः केचित्तु औपश्लेषिकमित्यस्य उपसमीपे श्लेषः संबंधस्तत्कृतमित्यर्थः पन्मा
सेतिक्रांते दीयते तस्मात् औपश्लेषिकमधिकरणमिति तत्र च दीयते कार्यमिति सूत्रे भाष्योक्तेः यत्किंचिदवयवावच्छेदेनाधारस्याधेयेन
व्याप्तिरणुपश्लेषः यथा कटे आस्ते इति एवमेव गंगैकदेशान्तरंतीषु कूपैकदेशस्थिते गर्गकुले गंगायां गावः कूपे गर्गकुलमित्यादौ बोध्यं
वैषयिकं तु अप्राप्तिपूर्वकप्राप्तिरूपसंयोगसमवायेतद्भिन्नसंबंधेन यदधिकरणं तत् यथा खे शकुनय इत्यादि अभिव्यापकं तु यद् स
र्वावयवावच्छेदेन व्याप्तिस्तत् यथा तिलेषु तैलं दध्नि सर्पिरिति इदमेव मुख्यं यत्र कृत्स्न आधारो व्याप्त इति भाष्योक्तेः असन्याप्यत्वे
च प्रकृतस्यर्थे तावच्छेदकविशिष्टज्ञानात् वर्णानां सांख्यादिमते द्रव्यत्वात् संयोग एव सूर्व परयोर्वैद्याधारस्याप्युपश्लेषनिरूपितस्य
स्वीकारेणैको यणचीत्यादावौपश्लेषिकेऽधिकरणे सप्तमी कटे शेत इत्यादौ कटाधिकरणकं शयनमिति बोधः फले वृक्षः कपिसंयोग

20 सीत्यादावव्याप्यवृत्तिधर्मवत्कार्त्तृकक्रियासमभिव्याहारे सप्तम्या अधिकरणेकासंयोगविशिष्टस्वकर्तृकासत्तेति बोधे अन्यत्रावयवे संयोगवि
शिष्टस्याभावप्रतीतेः कपिसंयोगेतद्वक्षेद्यत्वं फलति इति बोध्यं ग्रामं प्रविशतीत्यादौ कर्मणो ग्रामस्य नाधिकरणत्वं कर्मत्वेन बाधात् क
र्त्तृद्वारा क्रियाश्रयत्वविवक्षायाः संयोगरूपफलाश्रयत्वं विनाऽसंभवात् एवं ग्रामं गच्छतीत्यादावपि गमेः संयोगसमाधिकरणो व्यापारो
यदा विवक्ष्यते तदा ग्रामे गच्छतीत्यपि भवति अधीती व्याकरणे अत्र इन् प्रकृतिभूतस्य क्तांतस्य कर्मणि सप्तमी स्यर्थके नक्तस्येन्विषयस्येति
वार्त्तिकेन सप्तमी तेन कृतपूर्वी कटमित्यत्र न अत्र कृतपूर्वीति वद्भावे क्तो न कर्मणि कर्मणोऽभिहितत्वेन सप्तम्यनापत्तेः अनेनेत्यनुवर्त्तमाने
इष्टादिभ्यश्चेतीनिः कर्मसप्तम्यर्थः व्याकरणकर्मकाध्ययनकर्त्तेति बोधः अत्र कर्मशब्देन कालादिभिन्नमेव व्याख्यानात् तेन मासमधीती
व्याकरणे इति न स्याल्यां तंडुलं पचति स्थाल्यभिन्नाधिकरणवृत्तितंडुलाभिन्नकर्मवृत्तिविक्लित्यनुकूलो व्यापार इति बोधः मोक्षे इच्छास्ति
मोक्षवृत्तीच्छाकर्त्तृकासत्तेति बोधः प्रकृत्यर्थेच्छायामन्वयेतु कर्तृकर्मणोरिति षष्ठी मोक्षस्येच्छास्तीति मोक्षकर्मिकाइच्छास्तीत्यर्थः कृदर्थसि
द्धरूपेच्छान्वये सप्तमी बोध्या मोक्षमिच्छति चैत्रः चैत्रवृत्ती मोक्षाभिन्नकर्मवृत्तीच्छानुकूलो व्यापार इति बोधः सर्वस्मिन्नात्मास्ति सर्वाधिकरणि
का आत्मकर्त्तृकासत्तेति बोधः वनस्य दूरं दूरात् दूरेण दूरे वा चतस्रो विभक्तयः प्रातिपदिकार्थमात्रे ग्रामसंबंधिदूरदेशवृत्तिरिति बोधः च
र्मणि द्वीपिनं हंति दंतयोर्हंति कुंजरं केशेषु चमरीं हंति सीम्नि पुष्कलको हत इत्यादौ फलवाचकात् सप्तमी धात्वर्थकर्मणफलस्य संयोगसम

वायान्मतरसंबंधे सत्वेद्रस्यर्थकान्निमित्तात्कर्मयोगइति वार्त्तिकात्सप्तमीनिमित्तंफलं तच्च यल्लाभेच्छाधीनाक्रियानतत्फलं सप्तम्यर्थः कर्मसंबंध
श्चस्वरूपसंन्सप्तम्युत्पत्तौ नियामकः चर्मफलकंद्वीपिकर्मकंहननं दंतफलकंगजकर्मकं हननं केशफलकं चमरीकर्मकं हननंइति बोधः सीमाअं
डकोशः अंडकोशफलकहननकर्मीभूतोगंधमृगइतिबोधः अंडकोशमृगयोर्द्वीपिचर्मणोः श्चसमवायः अन्ययोः संयोगः मुक्ताफलायकारे
णं रघुवीरहंसीत्यत्र क्रियार्थोपपदस्येति चतुर्थी मुक्ताफलान्याहर्तुमितिबोधः ब्राह्मणेष्वधीयानेषु गतः गोषु दुह्यमानासु गतः अत्रयस्यभा
वेनक्रियया क्रियांतरंलक्ष्यते ततः सप्तमीत्यर्थकेन यस्य भावेनेतिसूत्रेण सप्तमी गोपद्दुह्यमानादिपदयोरुभयोरपि तद्वाचकत्वादुभाभ्याम
पि सप्तमी निर्ज्ञातदेशकालाक्रियाअनिर्ज्ञातदेशकालक्रियासंबंधिदेशकालपरिच्छेदकत्वेन लक्षणमिति बोध्यं एतेन भूयोदर्शनाश्रय
त्वाज्ज्ञाप्यज्ञापकभावस्य उदिते सूर्ये तमो नष्टमित्यादावेव स्यान्नत्वत्र कदाचिद्धि गोषुदुह्यमानास्वसौगतदृश्यपात्तं तत्र काचित्क्रियास्वा
धारकालेन अन्यांपरिच्छिनत्ति यथागोषुदुह्यमानास्विसाहौ काचित्तु स्वाधारकालाव्यवहितपूर्वकालेन यथा गोषु धोक्ष्यमाणास्विसा
हौ काचित्स्वाधारकालानंतरकालेन यथा गोषु दुग्धास्विसाहौ ज्ञापकत्वं च तत्तच्छब्दबोध्यत्वेन विवक्षितमेवैतच्छास्त्रप्रवृत्तौ निमित्तं नतु
तस्यमानांतरेण नियमतोग्रहणापेक्षेति नेदं भूयोदर्शनाश्रयं देशोदाहरणे तु सति गुणे स्थ्यत्वमस्तीत्यादि ज्ञाप्यज्ञापकभावः सप्तम्यर्थः
अस्य च क्रियायामेवान्वये साधुत्वं उक्तसूत्रात् अत्राधीयानानां ब्राह्मणानां दुह्यमानानां च गवां शब्दतः प्रतीयमानं लक्षकत्वं विशेषणी

२।

भ्रताध्ययनादिक्रियाकालद्वारकं विप्राप्नोति अधीयानब्राह्मणज्ञापकगमनाश्रय इति बोधः गोष्ठुधोऽस्य माणवस्य त्याहौ भविष्यन्त् होहेनादे
रपि वृष्ठुपारूढस्य सूर्वादिकालवद्वारकं ज्ञापकत्वं बोध्यं विवाहे नांदीमुखं कुर्यादित्यादौ विवाहपदेन तस्याकालोऽलक्ष्यते अधिकरणे स
प्तमी राहूपरागे स्नायादित्यादौ राहूपरागादिपदेन न ह्याश्रयः कालरुच्यते सप्तमीत्वधिकरणे गवां दोहे आगत इत्यत्राप्येवमेव अवच्छेदकावच्छे
देनान्वयस्यौत्सर्गिकत्वाद्राहूपरागकालावच्छेदेन स्नानविधाने तस्य निमित्तत्वं फलति एवमेवं गादिदेशगमनस्य पुनःसंस्कारनिमित्तता य
तु राहूपरागे इत्यादौ सतीसप्तम्याहाराद्यस्य च भावेनेति सप्तमी निमित्तत्वं तु सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपदिश्यत इति न्यायेन फल
तीति तत्र प्रवर्तनारूपविधिविषयत्वं क्रियाया एव न द्रव्यादेरिति हि भाष्ये होतीत्यादौ दध्नः कूर्यं विधेयत्वमित्याशंक्यानेन न्यायेन विधेयत्वमु
क्तं न्यायविद्भिः सिद्धं साध्यायोपदिश्यत इत्यस्याज्ञातं ज्ञाप्यत इत्यर्थश्च व्याख्यातः एवं च तेन न्यायेनाद्रव्यस्याज्ञातज्ञाप्यत्वरूपं विधेयत्वं स्व
क्रियोपरागेण च प्रवर्तनाविषयत्वमुक्तमिति प्रकृते तन्न्यायविषयाभावात् स्नानस्य मानांतराप्राप्तेः एतत्सूत्राप्राप्तेश्च राहूपरागस्यानि
र्वर्तिकालत्वाभावाच्च भिद्यते हृदः तस्मिन् दृष्टे परावरे इत्यत्र परं हिरण्यगर्भाद्यवरं यस्य तत्र ब्रह्मणि दृष्टे तद्विषयदर्शनोत्तरकाले कर्मा
दिक्षय इत्यर्थः क्षीयंत इत्यादि कर्मकर्तरिरूपं कर्मस्य क्रियारूपस्य शारीरादिनातावयवापचयरूपस्य यादेः कर्मत्वारोपात् हृदयग्रंथिशब्दे
न अविद्यारागभयद्वेषशोकवासनाः यद्वा दर्शने इति चर्मणि द्वीपिनमिति वत्सप्तमी तेन तद्दर्शनार्थं तत्परो स्वार्थं तत्परोऽस्य ज्ञानादविद्यादीनां

ष्ठि थित्रीभावे विद्युन्नद्युत्पादिनो व्यतेइत्यर्थः इयं शांकरभाष्यारीत्या स्पष्टं शयानैर्यवनैर्भुक्तं शयाना भुंजते यवना इत्यादौ तु नैतत्सूत्रप्रवृत्तिः क्रिया
याः क्रियाज्ञापकत्वस्यैव संभवाद्यस्य च लक्षणमित्येव सिद्धे भावपदसामर्थ्यात् प्रसिद्धकर्तृकक्रियायामेव प्रवृत्तेः मातरि साधुः स्वस्वः मातृसंबं
धिहितकारी असाधुर्मातुले मातुलसंबंधविप्रकारीति बोधः सत्सु तरत्सु असंत आसते अत्र संतरत्स तरणकर्तृत्वार्हाः संबंधः सप्तम्यर्थः स
च स्वक्रियाधिकरणकालवृत्तित्वरूपः तरणक्रियाकर्तृसत्संबंधि असत्कर्तृकमासनमिति बोधः अत्र यद्यपि असतां स्थितिक्रियार्हत्व
मिति इदमुदाहरणं अर्हकर्तृत्वे अनर्हाकर्तृत्वे वोदाहरणमिति संदेहस्तथापि क्रियार्हत्वानर्हत्वे अपि बोधविषयः यत्कृतमर्हत्वादिकं य
क्रियानिरूपितं तत्क्रियावाचकात्सप्तमी प्रत्यासत्तेः तथा च तरणक्रियायोग्यसत्कर्तृकक्रियाधिकरणकालवृत्ति असत्कर्तृकमासनमिति
बोधः असत्सु तिष्ठत्सु संतस्तरंति इदं तरणक्रियानर्हाणां तरणक्रियानर्हत्वे उदाहरणं तरणक्रियानर्हासत्कर्तृकास्थितिकालिकी सत्कर्तृ
का तरणक्रियेति बोधः सत्सु तिष्ठत्सु असंतस्तरंति तरणक्रियाकर्तृत्वार्हाणां तरणकर्तृत्वे उदाहरणमिदं तरणक्रियायोग्यसत्कर्तृकस्थि
तिसमानकालिकी तरणायोग्यअसत्कर्तृका तरणक्रियेति बोधः असत्सु तरत्सु संतस्तिष्ठंति तरणक्रियाकर्तृत्वानर्हाणां तरणकर्तृत्वे उदाहरण
मिदं तरणानर्हासत्कर्तृकतरणसमानकालिकी सत्कर्तृका स्थितिरिति बोधः रुदति रुदतो वा प्राव्राजीत् अत्र ज्ञाप्यज्ञापकभावः संबंधः षष्ठी
सप्तम्योरर्थः धातोरनादरविशिष्टं प्रव्रजनमर्थः एवमर्थे षष्ठीसप्तम्यौ तात्पर्यग्राहिके अनादरश्च प्रत्यासत्त्या पुत्रादिविषयक एव वैशिष्ट्यं च

२२ सामानाधिकरण्यस्योत्तरकालिकत्वाभ्यां एवं च रोदनकर्तृपुत्रादिज्ञाप्यमनादरविशिष्टं प्रव्रजनमिति बोधः गवां गोषु वा स्वामी ईश्वरः अ
धिपतिर्वा स्वत्वं षष्ठीसप्तम्योरर्थः गोवृत्तिस्वत्वनिरूपितस्वामित्ववानिति बोधः एवमेव दायादे यो लेके दायादशब्दस्य स्वाम्यर्थत्वादिति गवां
गोषु वा दायादः दीयमानो शरूपो दायस्तं आदत्ते दायादः सोपसर्गादपि निपातनात्कः नित्यसापेक्षत्वाद्वृत्तिः गवादिकं दीयमानेऽन्वेति गवाधि
न्नदीयमानांशकर्मकदानकर्त्रेति बोधः गवां गोषु वा साक्षी गोविषयकापरोक्षदर्शनकर्तेत्यर्थः द्रष्टेद्रष्टस्य वा प्रतिभूः गवां गोषु वा प्र
सूतः गाए वा नु भवितुं जातः आयुक्तो हरिपूजने पूजनस्य वा आसेवापदं रूढ्या तात्पर्यं वर्तते तच्च तदेकव्यापारता हरिपूजनरूपैकव्यापारवा
निति बोधः अत्राधिकरणत्वविवक्षायां सप्तमी प्राप्तौ षष्ठी सप्तमी विधिरायुक्तेति सूत्रेण हरिपूजने पूजनस्य वा कुशलः षष्ठी प्राप्तौ उभयवि
धिः पूजनसंबंधिकौशल्यवानिति बोधः नराणां नृषु वा द्विजः श्रेष्ठः अत्र यतश्च निर्धारणमिति सूत्रेण षष्ठीसप्तम्यौ यतः स्वेतरेभ्यः स्वघटित
समुदायघटकेभ्यो व्यावृत्तेन धर्मेण समुदायस्यैकदेशस्य जातिगुणक्रियासंज्ञाविशिष्टस्य पृथक्करणरूपं निर्धारणं ततः षष्ठीसप्तम्याविति
तदर्थः पृथक्करणं च व्यावृत्तधर्मप्रकारकज्ञानविषयीकरणं अस्मिंश्च नराणां विप्रः श्रेष्ठ इत्यादौ विप्रत्वादिविशिष्टस्य विप्रघटितनरस
मुदायघटकविप्रेतरव्यावृत्तश्रेष्ठत्ववत्तया प्रतीतिः एवं च निर्धारकधर्मनिर्धारणं च षष्ठ्या व्यावृत्तत्वाख्यः संबंधो निर्धारणविभक्तेर
र्थः नरादिपदं च सामान्यरूपेण विप्रतदितरनरादिघटितसमुदाये लाक्षणिकं एवं च विप्रेतरनरव्यावृत्तश्रेष्ठत्ववानिति बोधः नराणां

क्षत्रिये शौर्यं अत्र क्षत्रियेतरनरादिघटितसमुदायव्यावृत्तं क्षत्रियवृत्ति शौर्यमिति बोधः उक्तावयवभेदविवक्षया निर्धारणे विभक्तिविधेये
23 बहुवचनमेव साधु तिरोहितावयवभेदविवक्षायै कवचनं तु बहुवचिसौत्रत्वात् यथामिदं चांसास्मरइति ध्वनितं चेदं कारकइति सूत्रे कारके ष्विति ब्रूया
दिति वदताभाष्यकारेण · द्वंद्वः सामासिकस्य चेसत्राचित्तहस्तीतिसाम्म्हिकेटकिसमाससमूहमध्येइति मध्यपदाध्याहारेणबोधः इति केचित्
समाससमुदायावयवइत्यपि केचित् गवांगोषुवा कृष्णा बहुक्षीरा अत्र गोपदं गोत्वेन रूपेण कृष्णतदितरगोघटितसमुदायोपस्थापकं कृ
ष्णेतरगोव्यावृत्तबहुक्षीरत्ववती कृष्णेति बोधः गच्छतां गच्छत्सु वा धावन् शीघ्रः धावद्भिन्नव्यावृत्तशीघ्रत्ववान् धावनकर्तेति बोधः छात्राणां छा
त्रेषु वा मैत्रः पटुः मैत्रभिन्नछात्रसमुदायव्यावृत्तपटुत्ववान् मैत्र इति बोध इति दीक्षितोक्ताः अन्ये तु न निर्धारणे इति सूत्रेण निर्धारणस्य विभ
क्त्यर्थघटकत्वबोधनान्नपूर्वोक्तार्थः सूत्रस्वरससिद्धः तस्माद्यतः स्वसजातीयघटितसमुदायादेकदेशस्य जात्यादिभिः पृथक्करणरूपं निर्धा
रणं ततः षष्ठीसप्तम्याविति सूत्रार्थः निर्धार्यमाणेनि

१४५

23

मार्कवाय

८००



